சரசுவதி மகால் வெளியீட்டு எண்: 448

॥ शिवभक्तमाहात्म्यम् ॥

சிவபக்தமாஹாத்மியம்

(ஹரதத்தசரிதம்)

தஞ்சாவூர் மகாராஜா சரபோஜியின்

சரசுவதி மகால் நூலகம்

தஞ்சாவூர்

2002] [விலை ரு. 30—00

. T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Thanjavur Sarasvati Mahal Library Series No. 448

।। श्रीः ।।

।। शिवभक्तमाहात्म्यम् ।।

சிவபக்தமாஹாத்மியம்

(ஹரதத்தசரிதம்)

பதிப்பாசிரியர்

சாஹித்ய சிரோமணி

S. இராஜலக்ஷ்மி, எம். ஏ.,

சம்ஸ்கிருதப் பண்டிதர்,

சரசுவதி மகால் நூலகம், தஞ்சாவூர்.

தஞ்சாவூர் மகாராஜா சரபோஜியின்

சரசுவதி மகால் நூலகம்

தஞ்சாவூர் - 613 009.

2002)

(விலை : ரூ. **30-00**

Siva Bakta Mahatmiyam

0448

Sarasvati Mahal Library. Thanjavur-2016

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

BIBLIOGRAPHICAL DATA

Title of the Book	:	SIVABAKTA MAHATMIAM
Editor	:	S. Rajalakshmi
Publisher	:	Director, Sarasvati Mahal Library, Thanjavur - 613 009
Publication No.	:	448
Language	:	Sanskrit & Tamil
Edition	:	First
Year of Publication	:	September, 2002
Paper used	:	TNPL 10.9 Kgs.
Size of the Book	:	25 x 19 cm.
Printing Type Used	:	16 point
Number of Pages	:	96
No. of Copies	:	250
Printer	:	DTP Sarasvati Mahal Library, Thanjavur.
Binding	:	Board
Subject	:	Puranam
Classification	:	Q23:38.44114K
Price	:	**Rs. 30-00**

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

வெளியீட்டாளர் முகவுரை

அறம், பொருள், இன்பம், வீடு என்ற நான்கு பேறுகளை மனிதன் அறியவேண்டும் என்பதை நம் வேதங்கள் பகர்கின்றன. இதே பொருண்மையைப் புராணங்கள், கதைவடிவம் தாங்கி, எளியமுறையில் வெளியிடுகின்றன. இத்தகைய புராணங்கள் ஆங்காங்கே நமக்கு வாழ்வியல் நெறிகளையும் உணர்த்துகின்றன. புராணங்கள், மகாபுராணம், உபபுராணம், தலபுராணம் எனப்பிரிக்கலாம். இவற்றுள், தலபுராணங்களில் சிவபக்தமாஹாத்மியம் என்னும் நூல் தற்போது வெளிவருகிறது.

இத்தலபுராணம் காவிரி நதியின் வடபாலுள்ள கஞ்சனூரில் அவதரித்த ஹரதத்தரின் சரிதத்தை விளக்குவதாகும். சரசுவதி மகால் நூலகத்தின் சமஸ்கிருதத்துறையில் உள்ள ஓலைச்சுவடியினைப் படிஎடுத்து, கதைச் சுருக்கத்துடன், இந்த நூலினைப் பதிப்பித்து வெளியிட்டுள்ளார் இந்நூலக சமஸ்க்ருதப் பண்டிதரான திருமதி. எஸ். இராஜலக்ஷ்மி அவர்கள். இந்நூலினைச் சிறந்தமுறையில் பதிப்பித்துள்ள அவர்களுக்கு எனது பாராட்டுக்கள்.

இந்நூல் வெளிவர உறுதுணையாக இருந்த நூலக நிருவாக அலுவலர் திரு. சாமி. சிவஞானம் அவர்களுக்கும், இந்நூலக நூல் வெளியீட்டு மேலாளர் மற்றும் நூலகர் திரு. அ. பஞ்சநாதன் அவர்களுக்கும், இந்த நூலினைச் செம்மையாக அச்சிட்டுத் தந்துள்ள நூலக கணினிப் பிரிவுப் பணியாளர்களுக்கும், மற்றும் ஏனையோருக்கும் எனது பாராட்டுக்கள்.

இந்நூலை அச்சிட நிதியுதவி நல்கிய நடுவண் அரசுக்கும் எனது நன்றியைத் தெரிவித்துக் கொள்கிறேன்.

சி. கோசலராமன், இ. ஆ. ப.,
மாவட்ட ஆட்சித்தலைவர் மற்றும்
இயக்குநர்,
சரசுவதி மகால் நூலகம்.

தஞ்சாவூர்
21 - 9 - 2002

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

முன்னுரை

பண்டைக்காலத்திலிருந்தே நம் தஞ்சை மாநகரத்திற்குத் தனிச்சிறப்பு உண்டு என்பது உலகமறிந்த உண்மையாகும். இங்குதான் கலைத்தெய்வம், மிக்க மகிழ்ச்சியுடன் தாண்டவம் ஆடிக்கொண்டிருக்கிறாள். பொன்னியும் தன் முழுச்சாரத்தையும் இங்குதான் வெளிப்படுத்திக் கொண்டிருக்கிறாள். கி. பி. பதினாறாம் நூற்றாண்டில் இருந்து விஜயநகர சாம்ராஜ்யத்திற்குட்பட்ட நாயக்க மன்னர்கள் இந்நகரை ஆண்டு வந்தனர். இவர்களின் காலத்தில் காவிரியின் இரு கரைகளிலும் எண்ணற்ற கவிஞர்களும், புலவர்களும் தோன்றலாயினர். அக்காலத்தில் எழுதப்பட்ட பல வடமொழி நூல்களாலும் பொன்னிநாடு பொன்னாடாகவே திகழத் தொடங்கியது என்பதில் வியப்பில்லை.

அன்று நாயக்க மன்னர்களால் சிறிய அளவில் ஆரம்பிக்கப்பட்ட சரசுவதி மகால் என்ற இந்நூலகம், பிற்காலத்தில் வந்த மராட்டிய மன்னர்களாலும் ஆச்சரியப்படத்தக்க முறையில் பல அரியபெரிய ஓலைச்சுவடிகள், காகிதக் கையெழுத்துச் சுவடிகள், அச்சுநூல் இவைகளால் நிரப்பப்பட்டு கலைக்கடலாகவே திகழ்கிறது என்பது கண்கூடு. அப்படிப்பட்ட சிறப்பு வாய்ந்த ஓலைச்சுவடிகளில் ஒன்றான 'சிவபக்தமாஹாத்மியம்' (ஹரதத்தசரிதம்) என்னும் நூல் தற்போது வெளிவருகிறது.

மனிதன் எப்போதும் வேண்டுவது இன்பமே, துன்பமல்ல. அந்த இன்பம் எங்கு உள்ளது என ஆராய்ந்து; அறம், பொருள், இன்பம், வீடு என நால்வகைப் புருஷார்த்தங்களைக் கடைப்பிடிப்பதே என, வேதம் முதல் வள்ளுவம் வரை சான்றோர் கூறிய சித்தாந்தமாகும். வேதம், ஓர் தந்தை தனயனுக்கு உபதேசிப்பதுபோல் கண்டிப்புடன் 'இதைச் செய், இதைச் செய்யாதே' என்று கூறுவதால் படித்தவர்களும் பண்புள்ளவர்களும் திருந்தக் கூடும். ஏனையோரை நல்வழிப்படுத்தவே புராணங்கள் உதயமாயின. ஓர் நண்பன், தன் நண்பனைத் தீயவழியில் இருந்து திருப்பி நல்வழியில் செல்ல வைப்பதற்குப் பல கதைகள் மூலம் உபதேசிப்பவை புராணங்கள்.

புராணங்கள், கதைகள் மூலம் பக்தியையும் இறையுணர்வையும் வளர்க்க வேண்டுமென்ற நோக்கத்தோடுதான் அவைகள் எழுதப்பெற்றன. புராணத்தினைப் பொருள் அடிப்படையில் நோக்குகின்றபோது இவ்விலக்கியம் நீதி இலக்கியமாகவும், பக்தி இலக்கியமாகவும், சாத்திர இலக்கியமாகவும் கொள்ளத்தக்க வகையில் காட்சி அளிக்கிறது.

தனியாக ஒரு கடவுளையோ, அடியவரையோ குறிக்காமல் ஒரு தலத்துடன் சேர்த்துப் பாடப்பெறுமானால் அவை தலபுராணங்கள். புராணங்கள் இறைவனின்

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

செயலை வியந்து பேசுகின்றன. தலபுராணம் இறைவன் எழுந்தருளியுள்ள தலத்தை வியந்து பாடும். ஹரதத்த சரித்திரம் என்னும் நூல் பவிஷ்யோத்தர புராணத்தின் சிவபக்தமான்மியத்திலே கூறப்பட்டிருக்குன்றது. சிவ மணங்கமழும் சிவனடியார்கள் பரவும் சிவத்தலங்கள் நிறைந்தது சோழநாடு. இவற்றுள் காவிரி நதியின் வடபாலுள்ள கஞ்சனூர் ஒரு சிறந்த சிவத்தலம். இத்தலத்திலுள்ள சிவபெருமானை கற்பகம் என்று அப்பர் சுவாமிகள் கூறியுள்ளார். 'கற்பகத்தைக் கண்ணாரக் கண்டுய்ந்தேனே' என்பது தேவாரம். அதன் பத்துப் பாடல்களிலும் பாராட்டியிருப்பது போற்றத்தக்கதாகும். இத்தலம் ஹரதத்தர் அவதரித்த தலம். இந்த ஹரதத்த சிவாசாரியார் சைவத்தின் மேன்மையை ஸ்தாபித்த ஸ்தலம். இதனுடைய விளக்கமான சரிதம்தான் சிவபக்த மாஹாத்மியம் என்னும் இந்நூலாகும்.

சுவடியின் வரலாறு

ஹரதத்த சரிதம் என்னும் நூல், இந்த நூலகத்தில் சுவடி எண். B. No. 11206, D. No. 10629 என்ற எண்ணில் வைத்துப்பாதுகாக்கப்படுகின்றது. இந்நூல் ஓலைச் சுவடியில் கிரந்த எழுத்தில் எழுதப்பட்டுள்ளது. இச்சுவடி சுமாரான நிலையில் உள்ளது. சுவடியின் காலம் குறிப்பிடப்படவில்லை.

நன்றியுரை :

இந்நூலைப் பதிப்பிக்கும் பணியை எனக்கு நல்கிய நூலக இயக்குநரும், மாவட்ட ஆட்சித்தலைவருமான திரு. சி. கோசலராமன், இ. ஆ. ப., அவர்களுக்கும், இந்நூலக நிருவாக அலுவலர் திரு. சாமி. சிவஞானம், M. A., அவர்களுக்கும், வெளியீட்டு மேலாளர் மற்றும் நூலகர் திரு. அ. பஞ்சநாதன், M. A., M. L. I. S., அவர்களுக்கும், இந்நூல் சீரிய பதிப்பாக வெளிவர எனக்கு உதவிபுரிந்த திரு. A. வீரராகவன் அவர்களுக்கும் எனது நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

இந்நூல் சிறப்பான முறையில் ஒளி அச்சுக்கோப்பு - காப்பி பிரிண்டர் வழியில் அழகாகவும், செம்மையாகவும் அச்சிடப்பட்டுள்ளது. இப்பணியைச் சிறப்பாகச் செய்தளித்த திரு. R. சுப்ரமண்யன் அவர்களுக்கும், திரு. க. பத்மநாபன் அவர்களுக்கும், மற்றும் இதற்குத் துணைநின்ற ஏனையோருக்கும் எனது நன்றியைத் தெரிவித்துக் கொள்கிறேன்.

தஞ்சாவூர்,
27-8-2002

S. இராஜலக்ஷ்மி,
சம்ஸ்கிருதப் பண்டிதர்
சரசுவதி மகால் நூலகம்.

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

கதைச்சுருக்கம்

முன்னொரு சமயம் ப்ரம்மா கைலாய மலையில் படைக்கும் சக்தியை வேண்டி பூவுலகில் காவிரியின் வடக்குக் கரையில் பவித்ரமான கம்சாகரம் என்னும் க்ஷேத்திரத்தில் கடுமையான தவம் செய்தார். காலப்போக்கில் சம்சாகரேஸ்வரர் அவர்முன் தோன்றி, 'பிரம்மனே, உன்னுடைய தவத்தினாலும், சிறந்த நியமங்களினாலும், பூஜையினாலும் மகிழ்ந்தேன். உனக்கு விருப்பமானதைக் கேள்' என்று கேட்க, பிரம்மனும் பகவானாகின்ற தாங்கள் 'ச்ருஷ்டி' செய்வதைத் தனக்குத் தருமாறுவேண்ட, ஈச்வரனும் அவருக்கு அதனைக் கொடுத்து அப்பொழுதே மறைந்தார். இந்திரன் விருத்திரன் என்பவனைக் கொன்று, போரில் வெற்றிபெற்று திரும்பும் வழியில் பல்வேறு புண்ணிய ஸ்தலங்களைத் தேடி அலையும்போது, கம்சாகர க்ஷேத்திரத்திற்கு வந்து நதியில் நீராடி பகவானை ஆராதித்து விருத்திரனைக் கொன்ற, பிரம்மஹத்தி தோஷத்தில் இருந்து விடுபட்டு மீண்டும் ஸ்வர்கத்தினை அடைந்தான். மேலும், வித்யுன்மாலி, தாரகாக்ஷன், கமலாக்ஷன் என்ற மூவரும் பரமேஸ்வரனைத் தவத்தினால் ஆராதித்து, முப்புரங்களையும் பெற்றார்கள். தேவர்களாலும், அசுரர்களாலும் வெல்லப்படமுடியாத இவர்கள் மூவரும் உலகிற்குப் பல துன்பங்களைச் செய்தனர். இதனைப் பொறுக்க முடியாத பிரம்மன் முதலிய தேவர்கள் வைகுண்டவாசியான விஷ்ணுவை அடைந்து முறையிட்டனர்.

பிறகு விஷ்ணு, தேவர்களோடுகூட கைலாயத்திலிருந்து புறப்பட்டு மேருமலையை அடைந்து அந்த மூவருடைய அழிவை செய்வதற்கான உபாயத்தைப்பற்றி யோசிக்கும்போது, 'அம்மூவரும் மூன்று காலங்களிலும் சிவபூஜையினைச் செய்பவர்கள், எப்போதும் சிவநாமத்தினையே கூறுபவர்கள். சிவனுடைய கருணைக்கு இருப்பிடமானவர்கள்' என்றும் கூறினார். இதனைக் கேட்ட தேவர்கள் மிகவும் பயந்து, 'நாராயணனே! எங்களைக் காப்பாற்றுங்கள்' என்று வேண்டினார்கள்.

அப்போது விஷ்ணு, நாரதரை அங்கு வரவழைத்து, அவருடன் புறப்பட்டு அரக்கர்களுடைய இருப்பிடத்திற்குச் சென்று அவர்கள் மூவருக்கும் ஸ்ருதி, ஸ்ம்ருதிகளுக்கு மாறுபட்டவைகளை போதித்தார். அவருடைய மாயையால் பீடிக்கப்பட்ட அவர்கள் ஜன்மாந்தரங்களுக்கும் பலன் கொடுக்கக்கூடிய வைதிக கர்மாக்களை விட்டனர். பிறகு திரிபுரத்தில் மூன்று கால சிவபூஜையும் விடப்பட்டது. அப்போது நாரதர், விஷ்ணுவிடம் உங்களுடைய மாயையில் இருந்து யாராலும் மீளமுடியாது. அதற்கு தீவிர பக்தியை உடைய இவர்கள் மோஹமுற்றவர்களாக மாறியதே உதாரணமாகும் என்றார்.

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

பிறகு விஷ்ணு, தேவர்கள் முதலானோர் இந்நிகழ்ச்சிகள் அனைத்தையும் ஈச்வரனிடம் தெரிவிப்பதற்காக கைலாயமலைக்குச் செல்வோம், என்றுகூறி, அனைவரும் புறப்பட்டுச் செல்கின்றனர். ஆனால் அவர்களால் ஏறமுடியவில்லை. அப்போது அசரீரி, "நீங்கள் சிவபக்தர்களுக்கு அபசாரம் செய்ததால், உங்களால் ஏறமுடியாது" எனக்கூறியது. இந்த தோஷத்திற்குப் பரிஹாரம் கைலாயத்தைக் காட்டிலும் அதிக பெருமையையுடைய காவிரியின் வடக்குக் கரையிலுள்ள ஸ்ரீமத்கம்சாகரம் என்ற ஸ்தலத்திலுள்ள மஹேஸ்வரனைப் பூஜித்தால் இந்த மகாபாபத்தில் இருந்து விடுபடுவீர்கள் என்பதில் சிறுதும் ஐயமில்லை என்று கூறியது. தேவர்களும் அதுபோலவே பூஜித்தனர். அதனால் மகிழ்ந்த சிவன் பார்வதி ப்ரமத கணங்களுடன்கூட அவர்கள்முன் தோன்றி நீங்கள் செயத செயலுக்குப் பிராயச்சித்தம் கிடையாது. இருந்தபோதிலும் உங்களுடைய சிறந்த தவத்தினால், உங்களுக்குத் தொல்லைகளைத்தரும் இந்த அசுரர்களை நான் அழிக்கின்றேன் என்றுகூறி, பரமேச்வரனும் மறைந்தார். உபமன்யு தேவர்களிடம், தேவர்களே! உலகில் மிகவும் புகழ்பெற்ற ஆகமங்களின் தத்துவங்களை அறிந்த அறுபத்திமூன்று சிவபக்தர்களுள் முக்கியமானவராக ஹரதத்தாசாரியார் என்று ஒருவர் இருந்தார். அவரைப் பற்றிய பெருமைகள் ஏராளம். அவற்றில் ஒரு சிறிது அவரைப் பற்றிச் சொல்வதற்கு முயல்கின்றேன், என்று கூறினார்.

ப்ருகுவினுடைய சாபத்தினால் மஹாவிஷ்ணு பூமியில் அநேக அவதாரங்கள் செய்தார். அவற்றையும் எங்களுக்குக் கூறுங்கள்" என்று கேட்க, உபமன்யு கூறுகிறார். வாசுதேவர் என்பவர் மகனின் பொருட்டு விஷ்ணுவைக் குறித்துத் தவம் செய்தார். சுப்ரதீபன் என்பவன் மகளின் பொருட்டு விஷ்ணுவைக் குறித்து தவம் செய்தார். அப்போது விஷ்ணு மகாலக்ஷ்மியிடம், "நீ சுப்ரதீபனின் மகளாகப் பிறக்கவேண்டும். நான் வாசுதேவரின் மகனாகப் பிறக்கின்றேன்" என்று கூறினார். காச்யப வம்சத்தில் வந்த வசுதேவரின் மனைவி நாராயணீ சரியான நேரத்தில் கர்பத்தைத் தாங்கினாள். தந்தை கர்பத்திற்கான சம்ஸ்காரங்கள் அனைத்தையும் செய்தார். பிறகு நல்ல ஒரு நாளில் சிவனுடைய பாதாரவிந்தங்களையை எப்பொழுதும் நினைக்கக்கூடிய மகனைப் பெற்றாள். மகன் பிறந்த செய்தியைக் கேட்டு மகிழ்ந்த தந்தை ஜாதகர்மா முதலியவைகளான கர்மாக்களைச் செய்தார். பிறகு பதினோராவது நாள் குழந்தைக்கு "சுதர்சனம்" என்ற பெயரைச் சூட்டி, தனது கோத்திரத்திற்குத் தகுந்த கர்மாக்களைச் செய்தார். சுக்லபக்ஷத்துச் சந்திரன்போல நன்கு அக்குழந்தை வளர்ந்தது. பிறகு ஆறாம் மாதம் தந்தை, குழந்தைக்கு அன்னப்பிராசனம் செய்துவைத்தார்.

ஒருசமயம் தாய் குழந்தையை நன்கு ஸ்நானம் செய்வித்து, அலங்காரம் முதலியவைகள் செய்து திருநாமம் சாற்றினாள். வெளியே விளையாடச் சென்ற குழந்தை பசுபதி என்ற சிவபக்தரைப் பார்த்து அவரை நமஸ்கரித்து விபூதி, ருத்ராக்ஷம் முதலியவற்றை எனக்குக் கொடுங்கள் என்று கேட்டான். அவரும் அவ்வாறே கொடுக்க, அவன் மகிழ்ச்சியுடன் சிவாலயம் சென்று மகேஸ்வரனைப் பிரதக்ஷிணம்

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

செய்து நமஸ்காரம் செய்து பூக்களையும் சமர்ப்பித்தான். அதனைக் கண்டு மக்கள் வியப்படைந்தனர். மூன்றாவது வயதில் தந்தை அக்குழந்தைக்குசௌளகர்மாவையும், ஐந்தாவது வயதில் தனது சூத்திரத்தில் சொல்லியுள்ளபடி மௌஞ்சிபந்தனத்தையும் செய்து, தனது ஆசாரத்தைக் குழந்தைக்குச் சொல்லிக் கொடுத்தார். விஷ்ணுவினுடைய பதம் உன்னால் நினைக்கப்படவேண்டும் என்று கூறினார்.

இவ்வாறு தந்தையினால் கூறப்பட்டபோதிலும், அக்குழந்தை மீண்டும் விபூதியையும், ருத்ராக்ஷத்தையும் அணிந்துகொண்டு சிவநாமத்தையே ஜபித்துக்கொண்டு சிவனை வலம்வந்து கைங்கர்யங்களைச் செய்துகொண்டிருந்தான். இப்படிப்பட்ட குழந்தையின் செய்கைகளைக் கண்ட தந்தை மிகுந்த கோபத்துடன் பலமுறை கூறியும் தனது வார்த்தையைக் கேட்காததால் அவனை சாட்டையால் நன்கு அடித்துத் தனது ஆசாரங்களை மீண்டும் சொல்லிக்கொடுத்தார். அப்போதும் அக்குழந்தை சிவாலயம் சென்று சிவனின் நாமத்தை ஜபித்துக்கொண்டிருந்து. இதனால் கோபமுற்ற தந்தை குழந்தையின் தாயை அழைத்து, 'இவனுக்கு நான் சொன்னதைக் கேட்காதவரையில இவனுக்கு அன்னத்தைக் கொடுக்காதே' என்று கட்டளையிட்டார். சிவாலயத்தில் இருந்து வீடு திரும்பிய குழந்தை எனக்குப் பசிக்கிறது, அன்னம் கொடு என்று தாயின் கையை இழுத்தது. தாயும் தந்தையின் வார்த்தையைக் கேள், உனக்கு அன்னம் இடுகிறேன் என்று, தந்தை கூறியதைக் கூறினாள். இந்த வார்த்தையைக் கேட்ட குழந்தை, அக்னீச்வரர் ஆலயம் அடைந்து, ஸ்ரீஅக்னீச்வரரையும், கற்பகாம்பிகையையும் பிரதக்ஷின நமஸ்காரம் செய்து அக்னீச்வரரைப் போற்றி, "ஹே! மகேச்வரனே நான் தங்களைச் சரணமடைந்தேன். எனக்கு இனி தாங்கள்தான் பிதா, ஜகன்மாதாவாகிய கற்பகாம்பிகையே எனக்கு மாதா" என்றுகூறி பலவாறு போற்றிப் புகழ்ந்து இறுதியில் சோர்ந்து விழுந்துவிட்டான். உடனே பகவான் குழந்தையின் மனப்பான்மையின்படி பார்வதிதேவியுடன் ரிஷபாரூடராய் காட்சி அளித்தார். குழந்தை எழுந்து விழுந்து நமஸ்கரித்து மெய்மறந்து நின்றது. பரமசிவன் பாலனைத் தன் மடிமீது இருத்தி, உச்சி முகர்ந்து ஆலிங்கனம் செய்துகொண்டார். பிறகு, 'உனக்கு வேண்டிய வரத்தைக் கேள்' என்று சொன்னார். குழந்தையும் அந்த க்ஷணம் முதல் பகவானுடைய திருவடிகளை விட்டுப் பிரியாத வரம் கேட்டான். பரமேச்வரனும், 'உனக்கு சகல சாஸ்திரங்களிலும் தேர்ச்சி வரும்படி அருள்புரிகிறேன்' என்றார். நீ இந்த ஊரில் சைவ ஸ்தாபனம் செய்து சிவதத்வம் போதித்துக் கீர்த்தியுடன் சில காலம் வாழ்ந்து வருவாய் என்று அருளி தனது மலர்க்கையால் குழந்தையை 'சர்வக்ஞோ பவ' என்று அனுக்ரஹித்தார். உடனே சகல வேதங்கள், உபநிஷத்துக்கள், ஆகமங்கள், சாஸ்திரங்கள், புராணங்கள் எல்லாம் குழந்தையின் ஹிருதயத்தில் வந்து லயித்தன. குழந்தைக்குத் தனது மலர்க்கையால் விபூதியிட்டு ருத்ராக்ஷ மாலை அணிவித்து, பஞ்சாக்ஷர உபதேசம் செய்து, ஸ்படிகமலிங்கம் கொடுத்து, சிவபூஜா விதிகளையும் தாமே உபதேசித்தார். பிறகு குழந்தைக்கு 'ஹரதத்தர்' என்ற பெயரையும் சூட்டினார். தேவர்கள் புஷ்பமாரி பெய்தார்கள். பையன் பரமானந்தம் அடைந்து சுருதி வாக்யங்களால் பகவானை ஸ்துதித்தான். பகவான் மறைந்தருள, சிறுவனும் சிவாக்ஞை

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

மேற்கொண்டு வீட்டிற்குச் சென்றான். மஹேச்வரனிடமிருந்து மஹாமந்திரத்தை உபதேசம்பெற்ற குழந்தை, அவைதிகர்களை நல்வழிப்படுத்துவதற்காகப் பிறந்த குழந்தை என்று எண்ணி அனைவரும் அக்குழந்தையை சுற்றிவந்து நமஸ்கரித்தனர்.

வீட்டிற்கு வந்த ஹரதத்தர் தனது தந்தையை நோக்கி, 'எனக்கு எல்லாவிதமான ஞானங்களையும் பரமசிவன் அருளியுள்ளார். வேண்டுமானால் என்னிடம் எல்லா வித்தைகளிலும் பரீக்ஷை செய்து பாருங்கள்" என்றுகூற, தந்தையும் கேள்விகள் கேட்க இருவருக்கும் இடையே சண்டையானது ஏற்பட்டது. அப்போது ஹரதத்தன் எல்லா வேதங்களிலும், ஸ்ம்ருதிகளிலும், புராணங்களிலும், ஆகமங்களிலும் சிவனே பரத்வம் என்று ஆங்காங்கே கூறப்பட்டிருக்கின்றன" என்று கூறினான்.

அப்படியானால் நெருப்பினால் நன்கு சூடேற்றப்பட்ட மூன்று கால்களை உடைய இரும்பு ஆசனத்தில் எங்கள் அனைவரின் முன்பாக இவ்வாறு நீ கூறவேண்டும் என்று கூறினார்கள். குறித்த வேளையில் ஹரதத்தர் பிரும்மதீர்த்தத்தில் நீராடி விபூதி, ருத்ராக்ஷம் அணிந்து, சிவபூஜை செய்து சிவாலயம் சென்று அக்னீஸ்வரரையும், கற்பகாம்பிகையையும் வலம்வந்து நமஸ்கரித்துப் பின் வரதராஜர் கோயில் வந்து சேர்ந்தார். ஹரதத்தர், வரதராஜரை மும்முறை வலம்வந்து நமஸ்கரித்து மீண்டும் மீண்டும் பல்வேறு ஸ்தோத்திரங்களைச் செய்து எல்லாவற்றிற்கும் சாரம் "சிவதத்துவமே". ஆகவே இந்த பீடம் சந்திரனைப் போன்று குளிர்ச்சி உடையதாக ஆகட்டும் என்றுகூறி, இரும்புப் பீடத்தின் மீதேறி இனிது அமர்ந்தார். பீடம் செந்தாமரை மலர்போல் மெத்தென்று இருந்தது.

ஸ்ரீஹரதத்தர் சர்வக்ஞராக விளங்கின மகிமை நாடெங்கும் பரவியது. பாண்டிய நாட்டரசன் சிவலிங்கபூபதி என்பவர் கஞ்சனூர் வந்து ஹரதத்தாசாரிய சுவாமிகளைத் தரிசித்து அவர் பாதங்களில் நமஸ்கரித்து நின்றார். சுவாமிகளும் அருள்கூர்ந்து பஞ்சாக்ஷர உபதேசம் செய்தார். அரசனும் உள்ளம் பூரித்து அவருக்கு கனகாபிஷேகம் செய்து விடைபெற்றுச் சென்றான்.

நிற்க கம்சாகரத்தில் சுப்ரதீகர் என்ற சிவபக்தர் செய்த தவத்தின் பயனாக சாக்ஷாத் மகாலக்ஷ்மியே அவருக்குப் புத்ரியாக அவதரித்து, கமலவல்லி என்ற பெயருடன் வளர்ந்து வந்தாள். ஒருசமயம் சிவலிங்க பூபதியார் வாசுதேவருடன் பேசிக் கொண்டிருக்கையில் ஆச்சாரியாருக்கு விவாகத்திற்குரிய பருவம் வந்துவிட்டது என்று சொல்லி பக்கத்திலிருந்த சுப்ரதீகர் தனது பெண்ணை, ஹரதத்தருக்குத் தருகின்றேன். அதற்கான ஏற்பாடுகளை விரைவாகச் செய்துகொடுங்கள் என்று அரசனிடம் தெரிவித்தார். உடன் அரசனும் சிறந்த ஒரு ஜோதிடரை வரவழைத்துத் திருமண நாள் முதலியவற்றை முடிவு செய்தான். பிறகு அந்நகரமே விழாக்கோலம் பூண்டது. வீதிகள் முழுவதும் தோரணங்கள் கட்டப்பட்டன. ஹரதத்தருடைய திருமணம் வெகுவிமரிசையாக நடந்தது. திருமணத்தைப் பார்த்து கண்டுகளித்த அனைவரும் மிகுந்த மகிழ்ச்சி அடைந்தனர்.

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ஸ்ரீஹரதத்தரும் கமலவல்லியும் இல்லற தர்மத்தை வெகு ஒழுங்காகவும், சிவபக்கியிற் ஈடுபட்டவர்களாகவும் நடத்திவந்தார்கள். ஒருசமயம் சிவலிங்க பூபதியானவர் ஓர் உயர்ந்த பட்டுப் பீதாம்பரத்தை ஸ்ரீ அக்னீச்வரருக்குச் சாத்தும்படியாக ஓர் பிராம்மணர் மூலம் கொடுத்தனுப்பினார். அவர் வந்த சமயம் ஆசார்யார் அக்னிஹோத்ரம் செய்யும் சமயமாக இருந்தது. அந்த அக்னியிலே பீதாம்பரத்தை ஆகுதி செய்துவிட்டார். பீதாம்பரம் க்ஷணப்பொழுதில் எரிந்து சாம்பல் ஆயிற்று. இந்த நிகழ்ச்சியைப் பார்த்து அப்படியை அரசரிடம் தெரிவித்தார். அரசனும் உண்மையறிய திறனில்லாது மயங்கினான். பிறகு சுவாமிகளை தரிசனம் செய்தபோது மிகவும் பயபக்தியுடன் காலையில் அனுப்பிய பீதாம்பரம் சன்னிதானத்தில் சேர்ந்ததோ எனக்கேட்டான். சுவாமிகளும் அது நல்ல சமயத்தில் சேர்ந்தது என்றும், அக்னீச்வரருக்கு அர்ப்பணமானது என்றும் சொன்னார். அப்போதும் அவனுக்கு மனம் தெளியவில்லை. ஆனால் ஆசார்யாருடைய மகிமையை அறிந்தவராகையால் அவரை மேற்கொண்டு ஒன்றும் கேட்கவுமில்லை. சுவாமிகளுடன் கோயிலுக்குச் சென்று, ஈச்வர தர்சனம் செய்கையில், தான் அனுப்பிய பீதாம்பரம் அக்னீச்வர மகாலிங்கத்தின்மேல் சாத்தப்பட்டிருந்த அற்புதம் கண்டு மனம் தெளிந்தான்.

ஒருசமயம், ஒரு பிராம்மணர் ஹரதத்தரின் கால்களில் விழுந்து வணங்கி, தான் அறியாமல் ஒரு பசுவை கொன்றுவிட்டதாகவும், அந்த பாவத்திற்குப் பிராயச்சித்தம் கூறுமாறும் வேண்டிக் கொண்டார். அதற்கு ஹரதத்தரும் "சிவ சிவ" என்று இருமுறை மனதார பக்தியுடன் வேண்டி கூறு. உன்னுடைய பாபம் நீங்கிவிடும் என்று கூறினார். அதைக் கேட்டு மிகுந்த மகிழ்ச்சி அடைந்து, நடனம் புரிந்து தனது வீட்டிற்குச் சென்றான். அனைவரிடமும் அவன் கூறுவதைக் கேட்டு நகைத்து, அவனைப் பரிகசித்தனர். இருமுறை "சிவ" என்று கூறியவுடன் உனது பாபம் எவ்வாறு நீங்கிவிடும். அதற்கு வாய்ப்பே இல்லை எனக்கூறினார். உடன் மிகுந்த வருத்தமடைந்த அந்த பிராம்மணன் மீண்டும் ஹரதத்தரிடம் வந்து, அவர்கள் கூறியதைக்கூற, அதற்கு ஹரதத்தரும், "அவர்கள் என்ன செய்தால் உன்னுடைய பாபம் நீங்கிவிட்டதாக ஒப்புக்கொள்வார்கள்" என்று கேட்டுவா என அனுப்ப, அவனும் மற்ற அனைவரிடமும் சென்று, 'நான் என்ன செய்தால் ஒப்புக்கொள்வீர்கள் எனக் கேட்டான். அவர்களும், 'நீ அக்னீச்வரர் முன்னிலையில் உள்ள கல் நந்திக்கு இந்த அருகம்புல்லைத் தின்னும்படிச் செய்தால் எங்கள் மனம் தெளிவடையும்" என்றனர். சுவாமிகள் அந்தப் புல்லை வாங்கி, பிராம்மணர் கையில் கொடுத்து, நந்தியிடம் காட்டச்சொல்ல, அது தன் முகத்தைத் திருப்பி நாவைநீட்டிப் புல்லை வாங்கி மென்று தின்றது. எல்லோரும் மனமகிழ்ந்து ஆசார்யரைப் புகழ்ந்தனர்.

ஒருசமயம் ஒரு திருடன் அரசனது மாளிகையில் இருந்து பொருளைத் திருடிச் செல்லுங்கால் வீரர்களால் துரத்தப்பட்டு ஹரதத்தரின் வீட்டிற்குள் தஞ்சம் புகுந்தான். அவரிடத்தில் உண்மையை உரைத்தான். அவரும் தாம் அணிந்திருந்ததைப் போன்று உருத்திராக்ஷம் கொடுத்து, தனது பாத்திரத்தில் உணவு உண்ணச் செய்தார்.

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

வீரர்கள் வந்து கேட்டபோது, தனது மகனே உணவு உண்டுகொண்டிருக்கிறான். தேவை என்றால் சோதனையிட்டுக் கொள்ளுங்கள் எனறு சொன்னார். வீரர்கள் வீடு முழுவதும் தேடிவிட்டு திருடன் அகப்படாமல் திருப்பிச் சென்றனர். ஹரதத்தரும் சிவ த்யானத்திலேயே ஈடுபட்டவராக இருந்தார். சிவபெருமான் இதனைக் கண்டு மகிழ்ந்தவராக உமையுடன் காளையில் ஏறிக் காட்சி அளித்து, வேண்டும் வரங்களைக் கேட்டுக் கொள்ளுமாறு பணித்தார்.

ஹரதத்தர் தானும் தன் வீட்டின் இருபுறமிருக்கும் பதிமூன்று குடும்பத்தினரும் சிவலோக பதவி அடையவேண்டுமென வேண்டினார். பெருமானும் அவ்வாறே ஆகட்டும் என்றுகூறி அக்குடும்பங்கள் சிவலோகம் செல்ல விமானத்தைக் கொணர்ந்தார். எல்லோரும் ஏறிவிட, ஒருவர் மட்டும் காணவில்லையே எனச் சிவபெருமான் வினவ, ஹரதத்தரும், ஆனைமுகத்தோனை அல்லும் பகலும் வழிபடும் மூதாட்டி ஒருத்தி இன்று கொழுக்கட்டைகள் செய்துகொண்டிருக்கிறாள். விநாயகரைத் துதித்து, அவரது பூஜை முடிந்த பின்னரே, அவள் வருவாள் எனக்கூறினார். சங்கரரும் 'பூஜையைப் பெற்றுக்கொண்டு பின்னர் அவளைக் கைலாயம் அழைத்துவா எனக்கூறி மற்றவர்களை அழைத்துச் சென்றார்.

மோதகங்கள் நன்கு வெந்த பின்னர் அவற்றை விநாயகருக்குப் படைத்து, வழிபாடு செய்த பின்னர், விநாயகர் அவள்முன் தோன்றி வரங்களைக் கேட்குமாறு பணித்தார். கிழவியும் லோகோபகாரமாக, 'ஸ்வாமி! என்போன்ற ஓர் கிழவி தங்களைத் தினம் பூஜித்துவந்த விஷயம் உலகத்தில் நிலைத்துநிற்குமாறு இந்த இடத்தில் சாந்நித்யமாக இருந்து உங்களைப் பக்தியுடன் பூஜித்து, மோதகம் நிவேதனம் செய்யும் சகல ஜனங்களுக்கும் கைலாசபதவி அருளவேண்டும்' என்று பிரார்த்தித்தார். விநாயகரும் அவ்வாறே செய்வதாக அருளித் தனது துதிக்கையால் அவளை அணைத்துக் கைலாசத்தில் சேர்ப்பித்து, அவள் விருப்பத்தின்படி கஞ்சனூரில் ஸ்ரீஅக்னீஸ்வரர் ஆலயத்திற்குப் புறத்திலே நிரந்தரமாகக் கோயில் கொண்டார்.

நிற்க, கிழவி கைலாசத்தில் சேர்ந்த கொஞ்ச நேரத்திற்குப் பிறகுதான் ஹரதத்தரும் மற்றவரும் ஏறிச்சென்ற விமானம் கைலாசத்தை அடைந்தது. இதைப் பார்த்த ஹரதத்தாதியர் தங்களுக்குமுன் கைலை வந்த கிழவியின் மகிமையை அறிந்து உள்ளம் பூரித்தார்கள்.

இவ்விதமாக ஸ்ரீஹரதத்த சிவாசாரியாரும் அவர் வாழ்ந்த கஞ்சனூர் வாசிகளும், கைலாயம் சேர்ந்து சிரஞ்ஜீவிகளாக என்றும் சிவசன்னிதானத்தில் விளங்குகிறார்கள். இந்த சரித்திரத்தைப் படிப்போரும், கேட்போரும், பிறருக்குப் படிக்க வழங்குவோரும் சிவபக்தியில் சிறந்து விளங்கி சிவசாயுஜ்ய பதவி அடைவார்கள் என்ற பலச்ருதியுடன் இந்த சரித்திரம் முடிகிறது.

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। श्रीः ।।

।। महागणपतये नमः ।।

।। शिवभक्तमाहात्म्यम् ।।

हरिः ओं ।। उपमन्युः

पुरा कैलासशिखरे सृष्टिशक्त्यर्थमात्मभूः ।
आत्मनोऽभीष्टसिध्यर्थं तस्थौ निर्विण्णमानसः ।।

एतस्मिन् समये देवाः दभूदाकाशभारती ।
भूतलेऽस्ति महत्क्षेत्रं पावनं सह्यजातटे ।।

कंसारक इतिख्यातं तत्र गत्वा तपश्चर ।
इत्याकर्ण्याब्जपूरेण तत्क्षेत्रं हृष्टमानसः ।।

तत्र गत्वा निरङ्गारतपस्तेपे सुदुष्करम् ।
एवं बहुतिथे काले गते कंसाकरेश्वरः ।।

तपसा तोषितस्तस्य दययाविरभूत् पुरः ।
प्रसन्नोऽस्मि तव ब्रह्मन् पूजया नियमेन च ।।

वरं वरय ते प्रीत्याभीष्टदोहमिहागता ।
इत्युक्तो देवदेवेन गिरीशेन पितामहः ।।

यति प्रसन्नो भगवान् आद्यमह्यं प्रदीयताम् ।
सृष्टिसामर्थ्यमित्युक्तं तेन कंसारकेश्वरः ।।

प्रदायाभीप्सितं तस्मै तत्रैवान्तरधीयत ।
वृत्रं हत्वा पुरेन्द्रोऽपि वीरहत्या निवृत्तये ।।

कुत्रापि पुण्यस्थानेषु सञ्चरन्नापशर्म सः ।
तदशरीरिणी प्रवाहा कावेर्योत्तरे तटे ।।

अस्ति कंसाकरक्षेत्रं तत्र गत्वा तपः कुरु ।
इत्युक्तस्सवृषा गत्वा तत् स्थलं सह्यजाजले ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्नात्वा देवं समाराध्य श्रीमत् कंसाकरेश्वरम् ।
वीरहत्या मोचितस्सन् पुनः स्वर्गं ययौ वृषा ।।

विद्युन्माली तारकाक्षः कमलाक्षच्च सोदराः ।
तपसाराध्य गिरिशं प्रापुस्त्रीणि पुराणि च ।।

अजेया देव दैत्याद्यैः लोकोपद्रवकारिणः ।
तत्पीडामक्षमास्सर्वे ब्रह्मेन्द्राद्यामरुद्गणाः ।।

ययुः वैकुण्ठसदनं तत्र देवं जनार्दनम् ।
नत्वा स्तुत्वा पुरस्तस्य बद्धाञ्जलिपुटा स्थिता ।।

तानवलोक्य कृपादृष्ट्या विष्णुर्गणानान्सुरान् ।
प्रोवाच यूयं ब्रह्माद्याः किमर्थं मामुपागताः ।।

ब्रूत गुह्यं प्रकाशं वा युष्मदुःख निवारये ।
इति देवेन पृष्ठास्ते ब्रह्माद्यास्त्रिदिवौकसः ।।

प्रोचः परमसंत्रिस्तास्त्रीपुरोपद्रवार्दिताः ।
स्वामिन्नुपद्रुतास्सर्वे त्रिपुरैर्वरगर्वितैः ।।

येन केनाप्युपायेन तान्विनाशय केशव ।
तद्वाक्यं विष्णुराकर्ण्य तानुवाच सुरान् पुनः ।।

तदुपद्रवभीतोऽहं मेरुश्रृङ्गे चिरं स्थितः ।
भवन्तो त्रागमिष्यन्तीत्याहमागतवानिह ।।

अत्र स्थितान्नश्रुणुयुर्युदिते मायिनोऽसुराः ।
भूयिष्ठं पीडयिष्यन्ति तस्मिन्मेरुं व्रजामहे ।।

उवाच तेषां वृत्तान्तं सदाचार समन्वितम् ।
असुरास्ते महाभागास्सदाचारपरायणाः ।।

जाबालोपनिषन्मन्त्रै श्रौतेनैवतु भस्मना ।
उद्धूलनं त्रिपुण्ड्रं च धारयन्ति त्रिकालकम् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रिकालं शिवपूजां च कुर्युर्भक्तिपुरस्सरम् ।
शिवव्रतानि सर्वाणि कुर्युर्नित्य व्रतानि च ।।

वेदाध्ययन संपन्नाश्रौताग्नि परिचारिणः ।
प्रतिगेहं पुरोडाश हव्यधूपपवित्रिताः ।।

रुद्राक्षधारिणः सर्वे पञ्चाक्षरपरायणाः ।
शिवपूजाप्रभावज्ञापुराणार्थविशारदाः ।।

शिवनामान्युच्चरन्तः शिवभक्तप्रियास्सदा ।
तद्दर्शने तत् प्राणामे तत् पूजायान्निरन्तरम् ।।

उद्यता शिवपूजासु विशेषागमदर्शिनः ।
प्रदक्षिणनमस्कारान् शिवकैङ्कर्यमेव च ।।

निरन्तरं ते कुर्वन्ति स्त्रियस्तेषाञ्च तादृशः ।
भर्तृ शुश्रुषणरताश्शिवपूजापरायणाः ।।

पञ्चाक्षरजपासक्ता शिवकैङ्कर्यलोलुपाः ।
अरुन्धतीमाक्षिपन्त्य पातिव्रत्यव्रतान्विताः ।।

शिवेनापि कथं युद्धे विजेयात् सुरोत्तमाः ।
तेषान्नियमविध्वंसं कर्तुं स्मर्तुं मरुद् गणाः ।।

अनुमन्तुर्भवेन्नूनं महानरकयातनाः ।
असुरा अपि ते पूज्याः शिवकारुण्यभाजिनः ।।

तेषामपि स्मृतिं पुण्या महापातक नाशिनी ।
इति विष्णुवचः श्रुत्वा देवास्तु भयकंपिताः ।।

ऊचुः प्राञ्जलयः सर्वे रक्ष रक्षेति तं हरिम् ।
तदा विष्णुरमेयात्मा महादेवं घृणानिधिम् ।।

ध्यात्वा बुद्धो बभूवाथ तच्छिष्यो नारदोऽभवत् ।
तेन साकं ययौ तेषां पुराणि त्रीणि भूसुराः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दृष्टप्रत्ययकारीणि कर्माण्युपदिदेश सः ।
ते तच्छ्रुत्वा सुरास्सर्वे तन्माया परिमोहिताः ।।

तत्यजुर्वैदिकं कर्म जन्मान्तरफलप्रदम् ।
तत् स्त्रियोऽपि वचःश्रुत्वा तच्छिष्यापि मोहिताः ।।
पातिव्रत्यं समुत्सृज्य व्यभिचारैकतत्पराः ।।

बभूवुः त्रिपुरे तस्मिन् स्त्रयः पूजान्नतत्यजुः ।
निवृत्य गुरुशिष्यौ तौ कृतकृत्यौ बभूवतुः ।।

पथितं नारदः प्राह गुरुमाचारसंयुतः ।
मायेयं तव दुर्लंध्या सुरासुरनरादिभिः ।।

पश्यैतान् दृढभक्तास्त्रीन् विहायान्यान् विमोहितान् ।
एवमेवेति तं चोक्त्वा हिमाद्रि शिखरं ययौ ।।

तत्र ब्रह्मादिकान् देवान् दृष्ट्वा प्राह जनार्दनः ।
कृतकृत्या वयं जाता असुराः व्याकुलीकृताः ।।

बौद्धाचारप्रविष्टास्ते वैदिकं कर्म तत्यजुः ।
ततो विष्णुमुखादेवाः ययुः कैलासपर्वतम् ।।

एतत् वृत्तान्तमखिलं विज्ञापयितुमीश्वरे ।
तदा पर्वतमारोढुं अशक्तागततेजसः ।।

किमेतदिति संचिन्त्य विष्ण्वाद्याः विस्मयं ययुः ।
परस्परमनाचारं चिन्तयन्तोवतस्थिरे ।।

तदाऽशरीरिणी प्राह ब्रह्मविष्णवादिकान् सुरान् ।
यूयं भक्तोपचारेण शिवस्य परमात्मनः ।।

आरोढुमक्षमाश्शैलमित्युक्वा विरराम सा ।
ततो विचिन्त्य तद्दोषं परिहर्तुं दिवौकसः ।।
ब्रह्मविष्ण्वादयः सर्वे हिमाद्रे शिखरं ययूः ।
तत्र तेपुश्चिरं कालं अत्युग्रं परमं तपः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

न प्रसादं तथा तेषां चकार परमेश्वरः ।
विचिन्त्य पापबाहुल्यं ततः परममी सुराः ।।

कोटिवारं जलेमग्ना जेपुस्ते शतरुद्रियम् ।
तदाऽशरीरिणीवाणी प्राह विष्णुमुखान्सुरान् ।।

यूयं व्रजत भद्रं वो कावेर्या उत्तरे तटे ।
श्रीमान् कंसाकराभिख्यं कैलासादधिकं स्थलम् ।।

तत्र स्नात्वा सह्यजायां संपूज्य च महेश्वरम् ।
महापापविनिर्मुक्ता भविष्यथ न संशयः ।।

इत्युक्त्वा ते सुरास्सर्वे तदुक्तं स्थानमेत्य तु ।
मरुद्वृधाजले स्नात्वा भस्मोद्धूलित विग्रहा ।।

त्रिपुण्ड्रधारिणस्सर्वे तथा रुद्राक्षधारिणः ।
नियमेन नमस्कृत्य कृत्वाचैव प्रदक्षिणम् ।।

वेदोदितैः सर्वमन्त्रैः पूजयामासुरादृता .
ततः प्रसन्नो देवेशो लिङ्गादार्विबभूवह ।।

पार्वत्या वृषभारूढः प्रमथैः परिवारितः ।
प्राह गंभीरया वाचा हर्षयन् सर्वमानसान् ।।

वरं वृणुत भद्रं वो वरदोहमिहागतः ।
युष्माभिः कृतपापस्य प्रायश्चित्तं न विद्यते ।।

तथापि युष्मत्तपसा रुद्रैकादशिनी जपात् ।
अत्र स्थले विशेषेण पूजयासु महेश्वराः ।।

महापापं कृतमपि प्रायश्चित्तमभूत्तदा ।
तस्मात्सर्वेषु लोकेषु स्थानमेतं मम प्रियम् ।।

अत्र यूयं सर्वकालं पूजयध्वमतन्द्रिताः ।
युष्मत्पीडाकरान्दैत्यानचिरान्नाशयाम्यहम् ।।
इत्युक्त्वा देवदेवेश तत्रैवान्तरधीयत ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अध्यायमेतत् पठति द्विजेन्द्र
श्रृणोति वा भक्तियुतो मनुष्यः ।
सोऽनन्तमाप्नोति सुखं परं च
न जातु मातृस्तनपोभवेद्धि ।।

।। इति भविष्यत्पुराणे शिवभक्तिमाहात्म्ये पञ्चाशोऽध्यायः ।।

उपमन्युः

प्रसिद्धो हरदत्ताचार्य इति लोके महीसुराः ।
सकलागमतात्पर्यदर्शी ख्यात यशा भुवि ।।

त्रिषष्टिशिवभक्तानां मुख्यो वैदिकभूषणः ।
यशेश्वरोऽपि सर्वज्ञो महिमानमशेषतः ।।

अवगन्तुं समर्थोऽसौ मया तच्चरितं कथम् ।
कथितुं शक्यथेऽथापि किञ्चिद्वक्ष्यामि सांप्रतम् ।।

कंसाभिधान नगरे शिवप्रिय इति श्रुतः ।
कश्चित् स्वाचारनिरतः पञ्चयज्ञपरायणः ।।
उद्धूळनं त्रिपुण्ड्रं च धारयन् श्रौत भस्मना ।।

त्रिकालं शिवपूजायामासक्तो भक्तिपूर्वकम् ।
रुद्राक्षधारणं चैव तथा पञ्चाक्षरी जपम् ।।

कुर्वन् प्रदक्षिणं शम्भोः नमस्कारादि सत्क्रियाम् ।
शिवभक्तेषु शुश्रूषां कुर्वन्नास्ते द्विजोत्तमः ।।

सुमतिर्धर्मपालाश्च पुत्रौ तस्य बभूवतुः ।
बुद्धिमन्तौ रूपवन्तौ पुत्रौ पञ्चषडाब्दिकौ ।।

अक्षराभ्यासकुशलौ मधुरश्राव्य सुस्वरौ ।
सर्वनेत्रानन्दकरौ नानाभूषणभूषितौ ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पित्रोः प्रीतिकरावास्तां बालालीलादिभिस्तथा ।
एतस्मिन्नेव समये कदाचिद्दैवयोगतः ।।

विषूच्या सर्पदंशेन बालौ पञ्चत्वमागतौ ।
तौ दृष्ट्वा शोक सन्तप्तौमूर्छामाप शिवप्रियः ।।

पुनरुत्थाय तौ बालावालिङ्ग्य प्रललापह ।
जन्मान्तरे मया पूर्वं सतां द्रोहः कृतोनु किम्? ।।

युगपत् दारको यस्मात् परेतो मम दुर्मतेः ।

अथवा पातु कामेषु बालवत्सेषु नित्यशः ।।

कृपाहीनेन तु मया मातृणां शान्तिताः स्तनाः।
परेषां सञ्चितद्रव्यं किं मयाऽपहृतं पुरा ।।

ऋणरूपेणान्यधनं गृहीत्वा बहुशो मुदा ।
येन केनापि व्याजेन न दत्तं वा पुनर्धनम् ।।

अथवा कृषिकर्माणि कारयित्वा बहूनि च ।
भूतिर्मया न दत्ता वा प्रत्याहं कृषिजीविनाम् ।।

अथवा प्रलपन्तीयं ममपत्नी पुरशिशून् ।
सपत्नी तनयान् स्तेर्ष्या निजघान विषादिना ।।
सपत्नी तनयेभ्यो वै क्षुधितेभ्यो ह्यसूयया ।।

अदत्तान्नमपूर्वं वै भुक्तवत्या गळं किमु ।
युगपद्दारकौ यसमात् परेतौ मम दुर्मतेः ।।

अथ बालौ समुत्थाय हरतं शोकमावयोः ।
युवां सखाय पाठार्थमाह्वयत्यद्य पूर्ववत् ।।

उत्थाय पठितं श्राव्यमित्येवं प्रालपत्पिता ।
महाजनास्समागत्य तच्छोकमपनीय च ।।

संस्काराय गृहाद्बालावपनेतुं समुद्ययुः ।
पितापनायनं नैच्छद्बालयोः शोकविह्वलः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अतिक्रान्तो होमकाले विघ्निते देवतार्चने ।
तत्पूर्वजन्मवृत्तान्तं निवेदयितुमुद्यतः ।।

श्रीमत्सुदर्शनाचार्यः तावुद्धारयितुं गृहात् ।
प्रविश्य तद्गृहं बालावुद्रियेतां तु माचिरम् ।।

इत्यब्रवीत् तत्पितरि प्रत्याख्यातरि शोकतः ।
हन्त ! शोकाग्निना दग्धो माभूद्योगीश्वरस्त्विति ।।

बालौ सञ्जीवयामास वदन् भस्माभिमन्त्र्य च ।
तयो रुपरि तद्भस्म प्राक्षिपत्तदनन्तरम् ।।

तौ बालौ सहसोत्थाय दूरगौस्वस्वमूर्धनी ।
अञ्जलीन्निदधानौ तौ तिष्ठतस्समनन्तरम् ।।

पृष्टौ सुदर्शनाचार्यैः कौ युवां नामकिन्त्विति ।
नीचं वाचां तु भगवन् इत्येवं प्रत्यवोच ताम् ।।

जन्मनिह्यत्र युवयोरभूतां वां कथंत्विति ।
पुनः पृष्टौ पूर्वभवे नन्दवीराभिधानकौ ।।

भृत्यौ शिवप्रियस्यावां आवाभ्यां बहुवत्सरम् ।
हलकर्म तृणछेदः केदारस्य च पूरणम् ।।

लवनं पशुपालादि बहुकर्म चिरं कृतम् ।
क्षुद्बाधाय कुटुम्बानां भूतिर्दयेति चोदितः ।।

इदानीं किल दत्तेति तूष्णीं शपति कोपतः ।
पृष्ठो रज्वा यदि पुनः दण्डैर्वा प्रहरत्यलम् ।।

अन्यत्र कृषिकर्मार्थं गन्तुं वाऽपि न शक्यते ।
अस्मत्पितृभ्यां विक्रीता वाचामस्मिन् शिवप्रिये ।।

भृतेरदानादेतस्मिन् भवेस्य प्राप्य पुत्रताम् ।
एतावता च कालेन प्राप्तभृतिरशेषतः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एवमुक्ते तु बालाभ्यां जातिस्मरणकारणम् ।
वदतामिति स्पृष्टावाचार्यैः प्राहतुस्सुतौ ।।

एतेन सहवासश्च पापशान्तिरभूत्तदा ।
कावेरीतीरमरणाज्जनिर्जाता महामुनेः ।।

शिवप्रियस्य शुश्रूषा महिम्ना जाति संस्मृतिः ।
जातेति तस्मिन् समये कोटिसूर्य समप्रभम् ।।

मणिस्तंभसहस्राढ्यं किङ्किणीजालाशोभितम् ।
अप्सरो गणसंयुक्तं गीतवादित्रघोषितम् ।।

समारुह्य विमानाङ्ग्र्यं तावानेतुं शिवाज्ञया ।
शिवदूतास्समागत्य हे बालौ ! युवयोरिह ।।

भ्रात्रो राचार्यकृपया तद्भूतिः स्पर्शनादपि ।
शिवप्रियस्य शुश्रूषा माहात्म्याश्च समागता ।।

कैलास प्राप्तिरित्युक्तौ पूर्वदेहौ विसृज्य च ।
दिव्ये शरीरे आदाय विमानं अधिरुह्य च ।।

इत्यूचुः तौ च बालौ तत् शरीरे तु विसृज्य च ।
श्रीमत्सुदर्शनाचार्यमामन्त्र्य च शिवप्रियम् ।।

कैलासमध्ये तुश्शीघ्रं पश्यत्वेव जनेष्वहो ।
शिवप्रियस्य शिष्टत्वात्तयोश्चण्डाळ शङ्कया ।।

स्पृष्टुं संस्कर्तुमपि वा तदा तौ नान्वमन्यत ।
आचार्यस्तु विहस्य त्वं त्वदुपादि तयोस्तयोः ।।

शरीरयोः संस्करणे किमर्थ वा विशङ्कसे ।
माशङ्केत्युपदिश्यै तौ कारयामास संस्कृतिम् ।।

भृतेरदानदोषं च विचार्य च पुनः पुनः ।
शिवभक्तस्य शुश्रूषा माहात्म्यं च प्रशस्य च ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सौवर्ण्याचार्यमाहात्म्यं शिवप्रियसमन्विताः ।
सर्वे जना मुदा युक्ता स्वं स्वं निलयमाविशत् ।।

श्रीमत्सुदर्शनाचार्यः कृत्वा माध्यन्दिनक्रियाम् ।
प्रविवेशे गृहं तूर्णं शिवपूजार्थमादरात् ।।

ऋषयः --

एतदाचार्यमाहात्म्यं श्रुत्वा ते मुनिपुङ्गवाः ।
आनन्दाश्रुपरीताङ्गाः पुलकाङ्कित विग्रहाः ।।

हर्षगद्गदया वाचा मुनिमालोक्य संवृतम् ।
ब्रह्मन्युष्मन्मुखांभोज निस्सृतां पिबतां सदा ।।

सुदर्शनाचार्यकथा मकरन्दरसं मुने ।
तृप्तिर्नजायतेऽद्यापि कृपापाङ्गेन वीक्ष्य नः ।।

पुनस्सुदर्शनाचार्य जननादि कथाः शुभाः ।
चतुर्वर्गफलप्राप्त्यैविस्तरेणैव वर्णय ।।

भृगुशापान्महाविष्णुः लोकैकपरिपालकः ।
पञ्चविंशावतारं च कृतवान् पङ्कजेक्षणः ।।

इति श्रुतः पुराणेषु पुराऽस्माभिस्सविस्तरम् ।
अवतारं पञ्चविंशं कृतवान् कमलापतिः ।।

पुराणेषु श्रुतं पूर्वं न हि विस्तरतः श्रुतम् ।
पञ्चविंशावतारस्य किं रूपं किं प्रयोजनम् ।।
विचार्य वदनः सर्वं त्वं सर्वज्ञ शिखामणे ।।

उपमन्युः --

साधु पृष्टं हि युष्माभिरादरात् मुनिसत्तमाः ।
शिवप्रसादाद्वक्ष्यामि श्रृणुध्वं सावधानतः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पुरा शप्तो महाविष्णुः भृगुणा खिन्नमानसः ।
अवताराण्यनेकानि चकार समहीतले ।।

ऋषयः --

मन्दरं गतवान् विष्णुः श्रुतोऽस्माभिः महामुने ।
तद्वृत्तान्तमशेषेण वक्तुमर्हसि सुव्रत ।।

उपमन्युः --

इत्युक्तो भृगुणा विष्णुः वेपमानस्त्वरान्वितः ।
स्खलन् गरुडमारुह्य हृदि ध्याय महेश्वरम् ।।
प्रपन्नार्तिहरं रुद्रं सोमं सगणमीश्वरम् ।
ययौ बृन्दावनौ वासी मन्दरं चारुकन्दरम् ।।

किन्नरैर्जुष्टविपिनं नाना प्रस्रवणाकुलम् ।
नानागुणायुतोद्यानं नाना विहगनाद्रितम् ।।

नानावृक्षलतागुल्मं सुरभीकृतमारुतम् ।
मनः प्रह्लादनं रम्यं पारिजातवनान्वितम् ।।

नानारत्नैश्चितं हैमं हेमप्राकारतोरणम् ।
कैलाससदृशं रम्यं प्रासादैरतिशोभितम् ।।

एवमादिभिरन्यैश्च युतं चर्य विभूषितम् ।
संप्राप्य मन्दरं मन्दं हेमकन्दर सुन्दरम् ।।

नारायणस्तपस्तेपे जटी दण्डी च मेखली ।
भस्मदिग्धोग्निहोता च नित्यं त्रिषवणाप्लुतः ।।

कृच्छ्र चान्द्रायणाद्यैश्च शोषयन् सकळेबरम् ।
दिव्यं वर्षसहस्रं तु वायुभक्षस्ततोभवत् ।।

तं दृष्ट्वा तादृशन्नन्दी शिवस्यैवापरातनुः ।
महादेव प्रतीहारः कपि वक्त्राननद्युतिः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अयोनिजस्तपस्सिद्धः शालङ्कायणजप्रभुः ।
महेश्वरमुवाचेदं प्रणिपत्य विनीतवत् ।।

भगवन् भवतः स्थाने वनमाली मुरान्तकः ।
अनेककोटिवर्षाणि तपश्चरति दुश्चरम् ।।

किं विधायेहमनसि कृशोऽ.मनिशं ततः ।
नन्दिनो वचनं श्रुत्वा प्रसन्नवदनप्रभुः ।।

आरुह्य वृषभं देवः ससोमस्सगणेश्वरः ।
ब्रह्मादिभिस्तूयमानो वन्द्यमानो मरुद्गणैः ।।

जगाम तत्र यत्रास्ते तपस्सिद्धिरतोच्युतः ।
तमाह पुण्डरीकाक्षं विरूपाक्षो हसन्निव ।।

वत्स विण्णोप्रसन्नोऽस्मि पश्य मां वरदं तव ।
तव ज्ञातं महाविष्णो हृदिस्थं अपि मेहितम् ।।

द्रोहेण मम भक्तस्य मम द्रोहो न संशयः ।
मम द्रोहस्य शान्तिस्ते तपसानेन कारिता ।।

यत्र तप्तं तपः सिद्ध्येत् तं देशं वज्मितेऽधुना ।
तत्र गत्वा तपस्तीव्रं चरदुःखापनुत्तये ।।

विश्वाम्बरास्ति भूलोके पुरं कंसाकराभिधम् ।
कावेर्या उत्तरेतीरे दीप्तं परमपावनम् ।।

तत्र गत्वा महादेवं नत्वा कंसाकरेश्वरम् ।
तपः चर चिरंकालं शापान्मुक्तो भविष्यसि ।।

इत्युक्त्वा स महादेवः तत्रैवान्तरधीयत ।
ततस्सविष्णुर्लोकेशः शम्भुन्नत्वामुदान्वितः ।।

तपः कर्तुं मुदाप्रपुरं कंसाकरं ततः ।
भृगुशापनिवृत्त्यर्थं विष्णुः कंसकरेश्वरम् ।।

TCC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रिकालं पूजयन्नित्यं पञ्चाक्षरपरायणः ।
कुर्वन् त्रिषुवणस्नानं चीरवासा जटाधरः ।।

भस्मोद्धूळितगात्रश्च त्रिपुण्ड्राङ्कितमस्तकः ।
रुद्राक्षमालाभरणः पञ्चाक्षरजपेरतः ।।
कन्दमूलफलाहारो जीर्णपर्णाशनस्ततः ।।

शाकाहारो जलाहारो वायुभक्षो जितेन्द्रियः ।
निराहारस्ततः पश्चात् सूर्यदत्तविलोचनः ।।

ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थंडिलेशयः ।
हेमन्ते सह्यजातायां कण्ठदघ्नजले स्थितः ।।

ऊर्ध्वबाहुः निरालम्बो निरुच्छ्वासो जनार्दनः ।
महादेवप्रसादार्थमेवं तपस्तेपे महातपाः ।।

उग्रं तपः कुर्वतोऽस्य महान्कालः समत्यगात् ।
तद्ब्रह्मरन्ध्रजातोग्निः त्रैलोक्यमदहत्तदा ।।

वह्निना तेन विप्रेन्द्राः सदेवासुरमानुषाः ।
त्रैलोक्यं व्याकुलमभूत् ततो देवाः स्वयंभुवम् ।।

स्तुत्वा स्तोत्रैर्नमस्कृत्य तद्वृत्तान्तं न्यवेदयत् ।
तैस्समेताः कमलभूः कैलासं प्राप नाकिभिः ।।

तत्र गत्वा महादेवं नमस्कृत्वा पुनः पुनः ।
विष्णोस्तपोग्निना सर्वं त्रैलोक्यं सचराचरम् ।।

पीड्यते देवदेवेश ! पाहि ! शम्भो ! नमोस्तुते ।
इति ब्रह्मादिभिर्देवैः प्रार्थितः परमेश्वरः ।।

अरुढवृषभस्सर्वैः ब्रह्मादि दिविषद्गणैः ।
प्रययौ यत्र तपसा हव्यवाह इव ज्वलन् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आस्ते विष्णुरमेयात्मा ह्रदिध्यायन्महेश्वरम् ।
तमागत्य महादेवः प्राह गम्भीरया गिरा ।।

उत्तिष्ठ ! पद्मनाभ ! त्वं तपसा तोषितोऽस्म्यहम् ।
वरं वृणीष्व ! भो ! विष्णो ! वरदोऽहमिहागतः ।।

तदाकर्ण्य समुत्थाय दृष्ट्वा विष्णुर्महेश्वरः ।
तुष्टाव वाग्भिरग्र्याभि श्रुतिमूलाभिरग्रतः ।।

प्रहर्षोद्गतरोमाञ्चः साश्रुनेत्रः सगद्गदः ।
प्रणम्य चापतद्भूमौ प्रोवाच वचनं हरिः ।।

भगवन्नसुराणां तु कुर्वता रक्षणं प्रभोः ।
भृगुणा ब्रह्मपुत्रेण क्रोधाच्छप्तोस्मि मानद ।।

एकदण्डास्त्रिदण्डाश्च ये च भक्ताः प्रभो ! मयि ।
तेषां षण्ठाः कृतास्तेन दर्शनादपि पापदाः ।।

शयनासनवस्त्रादि दानात्तदनुवादनात् ।
तेषां महारौरवादि नरकं च प्रकीर्तितम् ।।

सरुषा भृगणानाथ यावदाभूतसंप्लवम् ।
विष्णो त्वमपि भोक्तासि नरकान् दशदारुणान् ।।

एवं निर्भत्सितस्तेन भीतस्त्वं शरणं प्रभो ।
गतोऽस्मि सर्वभावेन तस्मान्मां त्वं समुद्धर ! ।।

इति विज्ञापनं श्रुत्वा विष्णोश्शापाद्धि तस्य तु ।
सान्त्वयं प्राह गोविन्द मूर्ध्नि जिघ्रन् स्पृशन्मुहुः ।।

मद्भक्तशापो दुर्लङ्घ्यो ममापि पुरुषोत्तम ।
तथापि मत्प्रसादेन बहुजन्म न ते भवेत् ।।

मत्स्यः कूर्मो वराहश्च नारसिह्मस्तथैव च ।
धन्वन्तरीश्च भगवान् मोहिनी नारदस्तथा ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पृथुस्सनत्कुमारश्च विरासि(जि)त तथैव च ।
आविर्भावावतारास्तु दशसन्ति च ते तथा ।।

भार्गवो राघवश्चैव रामःकृष्णस्तथैव च ।
व्यासश्च बलभद्रश्च कपिलस्तु महानृषिः ।।

नरनारायणौ यज्ञो वामनो दत्त इत्यपि ।
वृषभश्च तथा बुद्धः कर्कीचैव सुदर्शकः ।।

योनिजाताः पञ्चदश अवतारा भवन्तु ते ।
अवश्यं हि मुनेस्तस्य भविता वचनं हरे ।।

किन्तु मे समयं विष्णो श्रृणु नास्त्यत्रचान्यथा ।
ममाश्रमरतान् शान्तान् ये द्विषन्ति नराधमाः ।।

ये च तान्पालयिष्यन्ति त्वत्भक्तास्ते विकल्मषाः ।
ये चाप्यपहसिष्यन्ति पाषाण्डास्ते जनार्दन ।।

सम्भाषणादपि हरे तेषां दोषा महान्नृणाम् ।
ब्रह्मचारिन् ग्रहस्थांश्च वानप्रस्थान् यतिं स्तथा ।।

ब्राह्मणदि चतुर्वर्ण्यान् शिवशास्त्रसमन्वितान् ।
ये द्विषन्ति द्विजाश्चैव पाषण्डास्ते न संशयः ।।

तेषां भक्तं हुतं जप्तं ध्यानं स्नानं च पूजनम् ।
भस्मनीव हुतं सर्वं सर्वं भवति निष्फलम् ।।

मदाश्रमस्थान् योपेद्वद्वेष्टि मां चैव माधव ।
ममाश्रमपरां स्तौति यस्समां स्तौति निर्मलः ।।

विष्णुः --

चतुर्ष्वाश्रम वर्णेषु त्वद्भक्तास्तु समीरिताः ।
तेषां किं लक्षणं देव कैर्गुणैस्ते तु संयुताः ।।

मद्भक्तैरवगन्तव्यास्तान्नो वद सुरेश्वर ।
त्वं हि मे परमो नाथस्त्वं हि मे परमो गुरुः ।.

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ब्रह्मचारी गृहस्थां च वानप्रस्थो यतिस्तथा ।
चत्वार आश्रमोह्येते पृथगाचारलक्षणाः ।।
एषां चतुर्णाम् चत्वारो मुनयोऽप्यवतारकाः ।।

एतेषामपि नामानि वासुदेवाऽवधारय ।
दधीचो गौतमोऽगस्त्यो दुर्वासाश्च यथा क्रमम् ।।

ब्रह्मचर्याश्रमस्थोऽभुत् दधीची च्यवनात्मजः ।
ग्रहस्थाश्रमनिर्माता गौतमोमुनिपुङ्गवः ।।

अगस्त्यो ब्रह्मऋषिर्वानप्रस्थ प्रवर्तकः ।
दूर्वाससापि यतिना आश्रमो निर्मदोमहान् ।।

नात्रश्रमेकृतं कश्चित् उत्कर्षो विद्यतेनृणाम् ।
परा दीक्षां विनाशैर्वा बन्धत्रय विमोचनाम् ।।

यत्र तत्राश्रमेस्थित्वा दीक्षाया तु विमुच्यते ।
परिग्रहश्चाश्रमाणां यथा रुचिनचान्यथा ।।

तस्मिन् मुक्तिर्दीक्षयैव नाश्रमैरन्यकर्मभिः ।
मृस्नायीचैव भिक्षाशी कौपीनान्मीनदण्डभृत् ।।

शिवाग्निपूजको ध्याता ब्रह्मचारीशिवस्मृतः ।
पर्वमैथुनहीनस्तु स्वदारनिरतो ग्रही ।।

देवतातिथिभिक्षूणां पूजकश्च कृपाकरः ।
वनवासी जटी होता सभार्ये फलमूलभुक् ।।

त्रिस्नातवल्कलीवानप्रस्थो ज्ञेयः स्वकर्मकृत् ।
कौपीनी निष्कळध्याता दण्डभस्मजटाधरः ।।

नाग्निर्नभार्यो भिक्षाशी त्रिस्नातावभवद्युतिः ।
गोत्रगोचर सन्तान लक्ष्यलक्षणलक्षितः ।।

दीक्षा व्याख्या प्रतिष्ठादि कर्तारो यतयो मताः ।
सर्वकर्माणि सन्यस्य सदा ध्यानपरायणाः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्र वान्यत्र वा ये स्युस्तथा सन्यासिनो मताः ।
अभोज्यान्ने नाधिकारश्शिवयोगं परात्परम् ।।

देहपातात्प्रतीक्षन्ते मुक्तिश्शिवसमानताम् ।
ब्रह्मचारी गृहस्था च वानप्रस्थो यतिस्तथा ।।

सर्वानुग्रहमाश्चैते नान्ये माधवकेचन ।
अथ किं बहुनोक्तेन पुनरुक्तेन केशव ।।

संक्षोपात् श्रुणुमद्वाक्यं भवाभ्युद्धरणप्लवम् ।
प्रमादाद्यति वा मोहात् प्रसुप्तो वाऽथ दुर्मतिः ।।

यः शिवेति स्मरेत् कश्चित तं विदुर्मां गुरुं यथा ।
एते नाह परां तृप्तिं गच्छामि किमतः परम् ।।

य ओं नमः शिवायेति प्रमादेनापि कीर्तयेत् ।
स तु मान्यश्च पूज्यश्च सर्वावस्थोऽपि सर्वदा ।।

रुद्र शंभो महादेव हर सर्वज्ञ शङ्कर ।
वामदेव श्रीकण्ठ नीलकण्ठेति यः स्मरेत् ।।

तं त्वां मामेव मन्येथा मन्नियोगादधोक्षजः ।
एतेनाहं परांतृप्तिं गच्छामि किमतः परम् ।।

भार्गवो भक्तवर्यो मे तच्छापो नान्यथा भवेत् ।
पञ्चविंशावतारास्ते भवंत्येवं जगद्धिताः ।।

उपमन्युः गौतमश्च दधीचिः कण्व एव च ।
अब्जभूर्नन्दिकेशश्च पुरा कांश्चित् महीसुरान् ।।

कृतापराधिनः केचित् बहुभिः कारणान्तरैः ।
वैदीकाचारविमुखाश्शिवनिन्दापरायणाः ।।

योनिमुद्रावहाः फाले पापिष्ठास्तु भवन्त्विति ।
इति शप्ता महाभाग जनिष्यन्तं कलौयुगे ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तेषां मध्ये सरोजाक्ष मनोज्ञे काश्यपान्वये ।
वैदनिन्दापरोनित्यं भक्तोरुद्राक्षनिन्दकः ।।

मन्निन्दको वैदिकानां मद्भक्ता च दूषकः ।
तप्तमुद्राधरो नित्यं पांञ्चरात्रपरायणः ।।

कश्चित् नाम्ना वासुदेव इति लोकेषु वुश्रुतः ।
भविष्यति महीदेवो देशिकः सर्वश्रृङ्गिणाम् ।।

सत्वामुद्दिश्य पुत्रार्थं चरिष्यति तपश्चिरम् ।
त्वमेव प्राप्नुयादस्य तन्मयत्वं मदाज्ञया ।।

बालक्रीडापदेशेन त्रिवर्षात्प्रभृति त्वया ।
सादरः पूज्यमानोऽहं प्रसन्नः पञ्चहायने ।।

तुभ्यं दास्यामि सकलं भुक्तिं विद्यां मनोरथान् ।
देहान्ते मम सायुज्यं इत्युवाच महेश्वरः ।।

पञ्चाजनसुतेगर्वं नाशयामि ततः परम् ।
विंशत्या जन्मसु पुनः पूजितस्संस्त्वया हरे ! ।।

अभीप्सितं प्रदास्यामि तुष्टो भव नचान्यथा ।
तवावताररूपाणि भजिष्यन्ति जनाश्च ये ।।

त्वन्मूर्तिसेवनात्सर्वे यास्यन्ति परमं पदम् ।
पुनरन्यद्वदाम्यत्र श्रृणु गुह्यं जनार्दन ! ।।

त्रिविधोगोपि भवतादेकांस्मिन्नेव जन्मनि ।
ये मां समर्चयिष्यन्ति लिङ्गरूपिणमीश्वरम् ।।

स्तुवन्ति कीर्तयिष्यन्ति नमन्ति सततं नराः ।
तेषां भुक्तिं च मुक्तिं च दास्याम्यहमसंशयः ।।

तस्मिन् कंसाकरे पुण्ये भक्ताह्यग्नीश्वरस्य तु ।
ब्राह्मणाः वैदिकाचाराः मम कारुण्यभाजनाः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तेषामपि स्मृतिः पुण्या महापातकनाशिनी ।
जाबालोपनिषन्मन्त्रैः श्रौतेनैव तु भस्मना ।।

उद्धूळनं त्रिपुण्ड्रं च धारयन्ता त्रिकालकम् ।
त्रिकालं शिवपूजां च कुर्युर्भक्तिपुरस्सरम् ।।

शिवव्रतानि सर्वाणि कुर्युर्निक्तव्रतानि च ।
वेदाध्ययनसम्पन्ना श्रौताग्नि परिचारिणः ।।

प्रतिगेहं पुरोडाशहव्यधूमपवित्रिताः ।
रुद्राक्षधारिणस्सर्वे पञ्चाक्षरजपेरताः ।।

शिवपूजा प्रभावज्ञाः पुराणार्थ विशारदाः ।
मम नामान्युच्चरन्तो मम भक्तिप्रियास्सदा ।।

मद्दर्शने मत्प्रणामे मत्पूजायां निरन्तरम् ।
उद्यता मम पूजासु विशेषागमदर्शिनः ।।

प्रदक्षिणनमस्कारान् मम कैङ्कर्यमेव च ।
निरन्तरं ते कुर्वन्ति स्त्रियस्तेषां च तादृशाः ।।

भक्तशुश्रूषणरताः मम पूजापरायणाः ।
पञ्चाक्षरजपाऽऽसक्ता मम कैंकर्यलोलुपाः ।।

अरुन्धतीमाक्षिपन्त्यः पातिव्रत्यव्रते रताः ।
सर्वदाऽधीतवेदान्ता मम पूजापरायणाः ।।

तथा परमहंसाश्च भस्मरुद्राक्षधारिणः ।
अग्निश्वराख्यामल्लिङ्गं सेवितुं तत्र नित्यशः ।।

भक्तातिशयया युक्ता वासं कुर्वन्ति तत्र वै ।
त्रिदिनं ये वसन्त्यत्र कुर्वन्ति द्विजतर्पणम् ।।

जपन्ति ये महामन्त्रं गुह्यं पञ्चाक्षरं शुभम् ।
तेषां पापानि नश्यन्ति कोटिजन्मार्जितान्यपि ।।
देहान्ते मम सायुज्यं प्राप्नुवन्ति न संशयः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विष्णुः --

देव देव महादेव चन्द्रार्धकृतशेखर ।
शरणं त्वां प्रपन्नोऽस्मि प्रार्थितं मे प्रदापय ! ।।

अस्मिन् कंसारकैर्नित्यं कुर्वन् शिव तवार्हणाम् ।
वसाम्यग्नीश्वरस्याहमेतद्देहि वरं मम ।।

शिवः --

यत्प्रार्थितं त्वया विष्णो ! तत्तथेव भवत्विह ।
इत्युक्त्वा देवदेवेशः तत्रैवान्तरधीयत ।।

स्थलमाहात्म्यमालोक्य ब्रह्मविष्ण्विन्द्रवन्हयः ।
प्रत्येक शिवलिङ्गानि प्रतिष्ठाप्याभ्यपूजयत् ।।

तीर्थानि च सनाम्ना च खनित्वारंजगारिभे ।
अद्यापि देवदेवस्य सेवां कुर्वन्ति नित्यशः ।।

सोऽपि लब्धवरो विष्णुः परिपूर्णमनोरथः ।
पश्यतां सर्वदेवानां अन्तिर्धिमकरोत्तदा ।।

।। इति भविष्योत्तरपुराणे शिवभक्तमहात्म्ये अष्टपञ्चाशोऽध्यायः ।।

उपमन्युः --

गौतमेन दधीचेन कण्वेन च मया तथा ।
ब्रह्माणानन्दिकेषेन शप्ता ये ब्रह्मणा पुरा ।।

ते तत्र विष्णोर्निकटे वैष्णवास्सन्ति केचन ।
श्वेतमृद्धारिणः श्वेतवस्त्रयज्ञोपवीतिनः ।।

तप्तमुद्राधारिणस्ते चान्तः कौपीनधारिणः ।
पठन्तिते प्रबन्धं च कृतं द्रामिडभाषया ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वेदोक्तचारविमुखाः पाञ्चरात्रपरायणाः ।
शिवनिन्दां सदाकुर्युः वैदिक द्विजदूषकाः ।।

क्रूरदृष्ट्या निरीक्षन्ते भस्मरुद्राक्षधारिणः ।
त्रिदण्डीव्यपदेशेन तेष्वजीवन्ति केचन ।।

द्वैताद्वतोभयभ्रष्टाः शिखायज्ञोपवीतिनः ।
एतादृशानामध्यक्षो वासुदेव इति श्रुतः ।।

विष्णुमुद्दिश्य पुत्रार्थं तपश्चक्रे दृढव्रतः ।
सुप्रतीकोऽपि कन्यार्थं तपश्चक्रे हरिं प्रति ।।

तस्मिन्नवसरे विष्णुः तयोः प्रियचिकीर्षया ।
महालक्ष्मीं समाहूय प्रोवाच वचनं मुदा ।।

कमले सुप्रदीपस्य भूमौ त्वं तनया भव ।
अहं च वासुदेवस्य भवामि तनयस्तथा ।।

इत्युक्तौ वैष्णवानेतान् पाषण्डमतमाश्रितान् ।
दृष्ट्वा देवो जगन्नाथः शेषशायी कृपावशात् ।।

एतानुद्धर्तुकामो वै वैदीकोद्धरणेच्छया ।
शिवप्रसादं लब्धुं च तस्मिन् कंसारके हरिः ।।

पितरं रोचयामास वासुदेव च श्रृङ्गिणीम् ।
काश्यपान्वय जातस्य वासुदेवस्य सुन्दरी ।।

नारायणीति विख्याता रूपेणाऽऽप्रतिमावधूः ।
पातिव्रत्येन धर्मेण ह्यरून्धत्यतिशायिनी ।।

भर्तृशुश्रूषणरता बन्धुपोषणतत् पराः ।
सा कालेन शुभं गर्भं वन्हिगर्भनिवारिणी ।।

बभार लोकभूत्यर्थं स्ववंशोद्धरणाय हि ।
बिभ्रती धार्य यं बालश्शिवभक्तो भविष्यति ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इति च पाण्डुदेहाभूत् भाविनोऽर्थस्य सूचका ।
पिता चकार गर्भादि वृध्यर्थगर्भसंस्कृतिम् ।।

ततः शुभेदिने लग्ने स्वोच्चसंस्थेषु पञ्चसु ।
ग्रहेषु पार्वतीस्कन्दमिव सन्ध्येन्दुमुज्वलम् ।।

सासूत तनयं बालं शिवपादाब्जचिन्तकम् ।
तस्मिन् जातेपुष्पवृष्टिर्बभूव त्रिदिवेरिता ।।

नेदुर्दुदंभयस्सर्वे ननृतुश्चाप्सरो गणाः ।
शैवानां दक्षिणां सोरू नेत्राणां स्पन्दनं तथा ।।

समभूद्वामभागे च वैष्णवानां तु श्रृङ्गिणाम् ।
शिवभक्तमनस्वास्थ्यं असिद्धांता वपुस्सुखाः ।।

निर्मलानि जलान्यासन् प्रसन्नास्सलिलादिश ।
संरक्षणाय शैवानां कृपाशैवीस्वरूपिणी ।।

धरांप्राप्तेन बभ्राज सबालोतितरा द्विजाः ।
पश्यन्जनाक्षिपद्मानां बालभानुरिवोदितः ।।

इहैव मम भूतेशः साक्षात्कारो भविष्यति ।
इतीवा मुञ्चदानन्द बाष्पंशोदच्छले न सः ।।

पुत्रस्य जननं श्रुत्वा तत्पमुद्राङ्कितः पिता ।
तुष श्रृङ्गित ततः स्नात्वा जगाम स्वं निकेतनम् ।।

आहूय तान् स्मृतिज्ञांश्च ब्राह्मणान् वेदपारगान् ।
गोभूधान्यहिरण्याद्यैः सुप्रीतान् अकरोच्च सः ।।

जातकर्मादिकांश्चैव कृत्वा तत् पूर्व मेव वा ।
एकादशोऽन्हि संप्राप्ते स्नातुं शिशुमलङ्कृतम् ।।

सुदर्शनाभिधं चक्रे स्वगोत्राप्रतिपादकम् ।
स बालो दिव्यैरूपेण कान्त्या सर्वजनप्रियः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शनैश्शनैर्वृद्धिमाप शुक्लपक्ष इवोडु राट् ।
कराम्बुजद्वयेनासौ पादाङ्गुष्टे द्वयं मुखे ।।

डोलालोलयमानस्सन् निवेश्य शुशुभेत्रिशम् ।
समातुरङ्गस्तन्यं पिबमन्दस्मिताननः ।।

करेण न्यस्त नासाग्रे महतिं प्रतिमातनोत् ।
षष्टेमासि पिता तस्य चक्रेन्नप्राशनं शिशोः ।।

स्वगृह्योक्त विधानेन बन्धुमित्रादिभिस्सह ।
बालोऽयं जानुसंचारैः अङ्गुल्यालंबनादिभिः ।।

अव्यक्तमधुरालापैः प्रीतिं पित्रोचकार ह ।
किङ्किणीजालामणिक्कमय हंसकङ्कणैः . . . ।।

विभूषितनुः केशबलेनापि विराजितः ।
मुक्ता प्रोतललाटस्थबलात् पत्रमनोहरः ।।

शिखाग्र विलसत् गुञ्जापुञ्जरंजितशीर्षवान् ।
श्रीकुण्डलोल्लसत्कर्णः कंण्ठ लम्बिललन्तिकः ।।

अङ्कणे सञ्चरन् बालो वीथ्यां कलभगाम्ययम् ।
झलझ्झलन्नूपरादि पित्रोः प्रीतिं दातव्यधात् ।।

क्रमेण शिवभक्ताग्र्यैः पथिसञ्चारितो शिशौ ।
धूली केलीच्छलेनायं तत् पांसून् शिरसा वहन् ।।

कस्मिन्चित् समये माता स्नापयित्वा सुतां शुभैः ।
विभूषणैर्भूषयित्वा तत् स्थानोचितैस्तथा ।।

हरिद्राकुङ्कुमाद्यैश्च लेपयित्वा विलेपनैः ।
कृष्वाञ्जिते ततः फाले श्वेतमृत्तिकया पुनः ।।

ऊर्ध्वपुण्ड्रं तथा कृत्वा मध्ये श्रीचूर्णमातानोत् ।
बहिर्निर्गत्य बालोऽयं वीथ्यां कञ्चन भूसुरम् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शिवभक्तं पशुपतिं प्रणम्य प्राह सादरम् ।
विभूतिं देहि विप्रेन्द्र ! रुद्राक्षं च शिवश्रियम् ।।

इति पृष्टः पशुपतिः कृपावान् सादरं ददौ ।
बालोपि श्वेतमृत्स्नां च मार्जयित्वा स भक्तिकम् ।।

भस्मनोद्धूल्य सर्वाङ्गं त्रिपुण्ड्राङ्किमस्तकम् ।
रुद्राक्षं च मुदा धृत्वा शिवालयमसौ ययौ ।।

तत्र प्रदक्षिणीकृत्य नमस्कृत्य महेश्वरम् ।
तत् प्रीतिकरकर्माणि कुर्वन् दृष्टः शिशुर्जनः ।।

सर्वे जनस्तमालिङ्ग्य मुदा प्रोवाच विस्मितः ।
पित्राद्यङ्गतस्तत्र क्रीडितुं योऽयमर्हति ।।

यदशक्यं मुनीनां च करोत्येषमहाद्भुतम् ।
यश्शिवं तत्र पद्मेन पूजयामास माधवः ।।

स एव रक्षितुं लोकान् जातो विप्रकुले हरिः ।
वेदमार्गान् स्थापयितुं शिवभक्तिं प्रकाशितुम् ।।

पिता तस्य त्रयऽब्दे चौलकर्म विधानतः ।
चकार विप्रमुख्यैश्च ततः पञ्चमवत्सरे ।।

स्व सूत्रोक्तेन मार्गेण मौञ्जीबन्धं ततः परम् ।
अथैनमाहूय पिता स्वाचारान् समुपादिसत् ।।

रुद्रालयं कदाचित्तु मा व्रजश्वेतभस्मना ।
उद्धूलनं त्रिपुड्रं च माकुरूष्व कदाचन ।।

रुद्रभक्तैश्च संसर्गं तत् सल्लापं च वर्जयः ।
तन्नामोच्चारणं चैव तथा रुद्राक्षधारणम् ।।

माकुरुष्व गृहाणाशु वर्णान् भाषात्रयं पठ ।
स्मरविष्णोः पदं शुद्धमित्युवाच पिता सुतम् ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एव मुक्तोऽपि पित्रायं विभूत्युद्धूलनं पुनः ।
कृत्वा त्रिपुण्ट्रं रुद्राक्षं धृत्वा शैवान् प्रणम्य च ।।

तत् पासून् शिरसा धृत्वा शिवनामोच्चरन् सदा ।
अग्नीवरालयं गत्वा तं च कृत्वा प्रदक्षिणम् ।।

पुनः पुनर्नमस्कृत्य तत् केङ्कर्यपुरोऽभवत् ।
अथ तत् चरितं दृष्ट्वा प्रकामं कुपितः पिता ।।

असकृत् प्रोक्तमपिमे वाक्यं बालश्शृणोति न ।
इति बुध्वा दृढं रज्वा सन्ताड्यकाशया पुनः ।।

स्वाचारमुपदिश्याथ बहिर्निगतवान् यदा ।
तदा सुदर्शनाख्योऽपि मुक्तबन्धः शिवालयम् ।।

गत्वा शिवप्रीतिकरं नामोच्चारणकर्मभिः ।
ध्यायन् आस्ते शिवस्याग्रे मनोवाक्कायकर्मभिः ।।

कृत्यं चकार तत्तारः प्राह पत्नीं सुतस्तव ।
यावत् वाक्यं न श्रृणुयात् न तावदर्शनं दिश ।।

नामेति प्रोच्ययातोस्मिन् शिवभक्त शिरोमणिः ।
विभूतिरुद्राक्षधरः सेवां कृत्वा महेशितुः ।।

भोजनार्थं गृहं प्राप मातरं प्रेक्ष्य तत्र सः ।
नितरां बाधते क्षुन्मां अम्ब मे भोजनं दिश ।।

इत्युक्त्वा करमाकृष्य बलात् कृत्वा जुहावताम् ।
सा चैनं प्राह भो वत्स ! यावत् त्वं न पितुर्वचः ।।

श्रृणोति तावदशनं नदेयं ते पिताब्रवीत् ।
पितृवाक्यं श्रृणु सुत! किमर्थं न श्रृणोपि च ।।

दैवतं मे पिता ते स्यात् किं कर्तव्यं मयाऽऽधुना ।
अनुनीता च पुत्रेण साश्रुनेत्रा बभूवह ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इति मातुर्वचः श्रुत्वा गृहात् निर्गत्य शीघ्रतः ।
रुद्रं अग्नीश्वरं नत्वा सायंकालेऽब्रवीदिदम् ।।

शम्भो त्वमेव जनको जननी च गौरीमत् भ्रातरौ ।
तव सुतौ परिचारकास्ते ज्ञप्ता मम प्रमथनाथ तथा ।।

प्यदृष्ट्वा त्वां सञ्चरामि शुंनकी कृम्वानिवाहम् ।
ध्यानेन विहीनं मां त्वत् पूजासु पराङ्मुखम् ।।
तथापि रक्ष कृपया दीनबन्धुर्यतो भवान् ।।

हरिणा चरणौ पुरा न दृष्टौ
विधिना तेन शिरोपि ते न दृष्टम् ।
कथमीश करोमि साङ्गपूजां
कृपया पाहि विचार्य किङ्करं माम् ।।

वृष्यहीनौषधीवत् त्वां अदृष्टाहं महेश्वर ।
क्लान्तोऽस्म्यहं सुप्रसन्नो भवदेव कृपानिधे ।।

अपि मां मशकप्रायं आगत्य त्वं कृपावशात् ।
एहि मद्धामपालेति कदा वक्ष्यसि शङ्करम् ।।

मात्राविहीन शिशुवत् द्वयेह नितरां शिवम् ।
न्यायं न ते निष्ठूरत्वं दासदासे शिशौ मयि ।।

अनाथबन्धो दीनोऽहं अत्यन्तं पादयोस्तव ।
पतामि त्वं दृष्टुमुच्छः प्रसन्नो भव साम्ब मे ।।

कैलासे भुवि वा वासां तवास्तु परमेश्वर ।
त्वां विनाहं न जीवेयं मूहूर्तमपि चेश्वर ।।

अत्यन्तदीनस्य मम प्रसन्नो न भवेत् भवान् ।
इदमन्याय्यमन्याय्य तव किं न्यायवत् भवेत् ।।

इति स्तुतो महादेवः शिशूनां सादरस्वयम् ।
आरूढवृषभो देव्या प्रादूरासीत् कृपानिधिः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मा भूत् भयं तवेत्युक्त्वा स्वीयां मूर्तिमदर्शयत् ।
सुदर्शनस्तदा शम्भो मतिविस्मित मानसः ।।

जटा गङ्गातरं गान्त चलदिन्दु जटाधरम् ।
खेलर्तुभिः भुजग त्वां द्वैरारूढमकुटीतटम् ।।

गौरीमणिमयादर्श कपोलतललंबिना ।
मण्डितं कुण्डलीशान कुण्डलेन मणीभृता ।।

दन्तामुक्ता निधानोष्टप्रवालमणिपेटकम् ।
स्मितश्री पुञ्ज किञ्जल्कं मञ्जुलानन पङ्कजम् ।।

मृगटङ्कवराभीति शस्त हस्त चतुष्टयम् ।
वृषधाटिचलाद्धार रुद्राक्षस्फारवक्षसम् ।।

ककुदास्फालनोदंचत् फाणिकङ्कण शिञ्जितम् ।
सहारूढाद्रिजाश्लेषोदंचत् रोमाञ्च कंचुकम् ।।

उत्तरीयायितोद्दण्ड वेतण्डाजिनमण्डितम् ।
कटिसूत्रायितव्याल लसद्व्याघ्राजिनां बरम् ।।

आखाण्डलाद्रि कोटीर कोटीमणि मरीचिभिः ।
आम्रेडितप्रभापूरस्फारमाणिक्य पादुकम् ।।

घृतकालिन्नवन्मूर्तसच्चिदानन्दसम्पदम् ।
आकारं वीक्ष्य वीक्ष्याग्रे प्राणनाम ननर्त सः ।।

स्तुत्वा च विविधैस्तोत्रैरानन्दाश्रून्यमुञ्चत ।
तदा कन्दलितानन्दनाथमालिङ्ग्य शङ्कर ।।

स्वांकमारोप्य चाघ्राय शिरस्येनमुवाच सः ।
अत्यन्तभक्तिं ते वीक्ष्य नितांतस्वांतमद्यमे ।।

तोषमेति तवात्यन्तं दुःख हेतुं वदाधुना ।
तेनैव मुक्तस्सशिशुः वीक्ष्यप्राप पिनाकिनम् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

किन्तु शक्यमशक्यं यत् द्रष्टुं ब्रह्मादिभिः सुरैः ।
रूपं दृष्टवतो मेऽद्य तव देव कृपानिधे ।।

अथैनमाहदेवोऽपि जाने व्यक्तवार्भकम् ।
पित्रोर्मृतं च ते दुःख मूलं प्राहाथ तं शिशुः ।।

अणोरणीयान् महतः त्वं महियान् महेश्वरः ।
जानासि वृत्तमस्माकं इत्यत्र तु किमद्भुतम् ।।

अनुज्ञां शिरसा धृत्वा पित्रोस्त्वं बालकाधुना ।
श्रुति स्मृतीतिहासादीन् पठेत्याह पिनाकधृक् ।।
सुदर्शनाभिधः प्राह तं कृपालुं महेश्वरम् ।।

अनन्त शास्त्रं बहु वेदितव्यं
अल्पश्च काले बहवश्च विघ्नाः ।
यत् सारभूतं तदुपासनीयं
हंसो यथा क्षीर मिवांबुमिश्रम् ।।
सर्वे वेदपुराणाद्यैः वेदस्त्वं परमेश्वर ।
स्मृतिं विना ते किमपि मास्तु तस्मात् मम प्रभो ।।

ततस्तं प्राह गिरिशः श्रुतिस्मृत्यादिभिर्विना ।
मत् स्वरूपं तवज्ञातुं भक्तिं कर्तुं न शक्यते ।।

सुदर्शनः —

बालोऽयमिति देवत्वं प्रलोभयितु मिच्छति ।
कश्चित् चिन्तामणिं प्राप्य किं वांच्छति वराटिकाम् ।।

अथ स्व पाणिकमले लिखित्वा मन्त्रमीश्वरः ।
अस्यसर्वज्ञ ता तुभ्यं इति तन्मौलिमस्पृशत् ।।

तस्मिन् क्षणे वरिष्टं तं महेश कृपया शिशुम् ।
प्रपेदिरे वेदमुखा विद्याः सिन्धुमिवापगाः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ततः श्रीदक्षिणामूर्तिर्भूत्वा श्रौतेन भस्मना ।
जाबालोपनिषन्मन्त्रैः कृत्वोद्धूलन मङ्गळे ।।

धारयित्वा त्रिपुण्ड्रं च दत्वा रुद्राक्षमालिकाम् ।
पञ्चाक्षरं चोपदिश्य स्फटिकं लिङ्गमुत्तमम् ।।

दत्वा पूजा विधानं च वैदिकागमचोदितम् ।
उपदिश्य ततश्चक्रे नामास्य हरदत्तकः ।।

आचार्य इति सोऽप्यस्य पादपद्मं स्वनेत्रजैः ।
आनन्दबाष्पैरासिञ्चत् सरोमांचोप्यवंदता ।।

ततः समुत्थाप्य कृतानुकम्पः
शिशूनिशीथे विमलाशिषं च ।
प्रोक्त्वाशनार्थं तव वेश्म गच्छेत्
युक्त्वा शिवोलिङ्गवरे विवेश ।।

।। इति भविष्यत्पुराणे शिवभक्तमाहात्म्ये षट्पञ्चविंशोध्यायः ।।

उपमन्युः --

सर्वज्ञत्व महामन्त्रं प्राप्य तस्मात् महेश्वरात् ।
अवैदिकान् समुद्धर्तुं जातः शिव इवाबभौ ।।

प्रदक्षिणं वन्दनं च कृत्वास्मै शिशुरूपिणे ।
हृदिध्यायन् महेशानं आजगाम निकेतनम् ।।

अस्मिन् काले पिता तस्य पिधायावारकं तदा ।
निद्राति जननी स्मृत्वा खिन्नासीत् क्षुधितं सुतम् ।।

शिवभक्ताग्रगण्योऽयं मुत्पाय्यावारकं तु मे ।
दिशान्नं क्षधितायेति चुक्रोशोच्चतरं मुहुः ।।

इमां शयानः पुत्रस्य वाचं श्रुत्वा पिता रुषा ।
उत्थाय रक्तनेत्राभ्यां दृष्ट्वैनमि दमाह सः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अविचार्य सुतं बालं ईशपादाब्जचिन्तकम् ।
मदुक्त कृत्या नियता करोष्यन्नं तदा तव ॥

दापयामि न रुद्रस्य सेवां कुरु कदाचन ।
अनधीत्यागमं भूत्या सितांगो गृहमागतः ॥

लुनामि पादौ यदि ते व्रजेत्याह पिता सुतम् ।
साक्षात् परब्रह्ममलंध्यात्मज्ञमजादिभिः ॥

दक्षो यथा न निन्दैष श्रृङ्ग्यसन्मार्गवर्त्यमुम् ।
तत् श्रुत्वा हरदत्तोऽयं तातं निन्दारतंशिवे ॥

त्रिशूलफालं तं वीक्ष्य स्मयमानमुवाच ह ।
गौतमेन दधीचेन कण्वेन ह्युपमन्युना ॥

ब्रह्मणानन्दिकेशेन शतायुष्मन्मुखापितः ।
तदन्तर्वर्तिनस्तेऽपि न तत्वं शाम्भवं स्मरेत् ॥

अस्मिन्नर्थे प्रत्ययं तं पश्य मे परमेश्वरः ।
सर्वज्ञ त्वं ददौ विष्णु नेत्रार्चितपदांबुजः ॥

परिक्षय त्वं वेदादि विद्यासु सकलासु माम् ।
अथ तातः सुतं प्राह किं नेत्रेणार्चयत् हरिः ॥

धीपूर्वं वञ्चितुं लोकान् कृतवान् कमलापतिः ।
तदर्चनं पापवतां यथार्थं भाति नान्यथा ॥

पित्रैवमुक्तस्तं प्राह शिवभक्तशिरोमणिः ।
विष्णोः सर्वेश्वरत्वं मे कथं श्रुत्योत्तरं वद ॥

एवं विवादे सञ्जाते पितुः पुत्रेण भूसुरा ।
उमेशभृत्यास्सम्प्राप्ता श्वेतमृत्धारिणः परे ॥

इतिहासैः परं तत्वं विष्णुरेवेति भाषितुम् ।
अशक्ता वैष्णवास्सर्वे विषादं प्रतिपेदिरे ॥

TCC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आनन्दमापुश्शैवेन्द्रो वासुदेवोऽतिदुःखितः ।
हरदत्तस्ततः प्राह तानालोक्य द्विजन्मनः ।।

द्विविधान् वैष्णवान् शैवान् इदं सर्व हितेच्छया ।
यदुक्तं सर्व वेदेषु तथा वेद शिरस्सु च ।।

स्मृतिष्वपि पुराणेषु भारतादिषु यत् श्रुतम् ।
इतिहासेषु यत् प्रोक्तं आगमेषु शिवेन तु ।।

शिव एव परं तत्वं इत्युक्तं तत्र तत्र तु ।
तदेवाहं प्रवक्ष्यामि वन्हितप्ते त्रिपादके ।।

अयः पीठो समासीनः सर्वेषामेव सन्निधौ ।
भवन्तोऽपि ब्रुवं त्वेवं नात्र कार्या विचारणा ।।

शैवास्तद्वाक्यमाकर्ण्य यूयं वा वयमेववा ।
अग्नीश्वरालयं गत्वा नन्दिशङ्करमध्यतः ।।

स्नात्वा कवेरजायां तु परं तत्वं वदत्विह ।
वैष्णवास्ते तदाकर्ण्य क्रूरदृष्ट्या निरीक्ष्य तान् ।।

वयं रुद्रं कुटिं क्वापि न पश्याम कदाचन ।
मध्ये स्थित्वा परं तत्वं शिव एव न चेतरः ।।

एवं ब्रुवंत्विति प्रोक्ते वैष्णवे हरदत्तकः ।
ततस्तानवदत् शंभुः पादाम्बुज विचिन्तकः ।।

युष्मत् संमतिरेवास्तु तप्तलोहत्रिपादिके ।
वक्ष्यामि संस्थितस्तत्वं शिव एवेति भोजनाः ।।

इति तद्वाक्यमाकर्ण्य वैष्णवालोह पीठकम् ।
आनीय वन्हि तप्तं तत् अतिदीप्तं भयङ्करम् ।।

कारयित्वा ततस्सर्वे ते विष्णोरालयं ययुः ।
तेषामपि पुरो गत्वा हरदत्तो महामतिः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विष्णुं प्रदक्षिणीकृत्य नमस्कृत्य पुनः पुनः ।
स्तुत्वा स्तोत्रैरनेकैस्तं व्याजहार वचास्पदम् ।।

देव देव जगन्नाथ हरपादाब्जचिन्तक ।
शिवपूजासक्तचित्त शिवभक्त शिरोमणे ।।

महाविष्णो महाभाग शरणागतवत् सलः ।
सर्वोऽपनिषदां सारं शिवतत्वं भवेद्यदि ।।

तदा त्वत् सन्निधौ तप्तलोहपीठमिदं प्रभो ।
हिमांबुशीतलं भूयात् इत्युक्त्वा तत् प्रदक्षिणम् ।।

कृत्वा ध्यात्वा महादेवं पार्वतीसहितं विभुम् ।
शुद्धस्फटिकसंकाशं चन्द्रकोटिस्सुशीतलम् ।।

नीलकण्ठं त्रिनयनं चन्द्रगङ्गा जटाधरम् ।
तस्मिन् निषण्णः पीठेऽभूत् हरदत्तो महामतिः ।।

शैवानां वैष्णवानां च मध्ये वक्तुं प्रचक्रमे ।
द्राविडच्छन्दसा नेतान्वीक्ष्यधिकृत्य वैष्णवान् ।।

महेशं मनसिध्यायन् शिवैकप्रतिपादिनीम् ।
तत्वार्थमुक्तमाम्नाय सूक्तिमाला मनीनयत् ।।

भव वैराग्यमुक्तोऽपि भवलग्नैकमानसः ।
विभूत्यातिविरक्तोऽपि विभूत्यामतिलालसः ।।

विष्णूवाद्याश्च पुरत्रयं सुरागता जेतुं न शक्ता स्वयं
यं शम्भुं भगवन् भवन्तु पशवोस्माकं त्वमेवेश्वरः ।
तेन त्वां शरणागतः पशुपते पाहीत्यवोचत् द्रुतम्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि।।

यस्येषुः कमलेक्षणः पशुपते रब्जोद्भवः सारथिः
यस्य ज्याफणिनामिनोरथपदेयस्येन्दुसूर्यावुभौ ।

TCC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मेरुर्यस्यशरासनं रथवरो भूमिस्तु यस्या भवेत्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ।।

यस्येषुः कमलेक्षः पशुपते रब्जाद्रवः सारधिः
यस्य ज्याफणिनामिनोरथपदेर्यस्येन्दुसूर्यावुभौ ।
मेरुर्यस्यशरासनं रथवरोभूमिस्तु यस्या भवेत्
तस्मिन् मे हृदयं सुखनरमतां साम्बे परब्रह्मणि ।।

यत् भक्तो भृगुरिन्दिरापतिमहो शापस्य लक्ष्यं भृशं
कृत्वा स्वांदयितां मृतां सुमनुभिः शैवैश्चकारार्जुनाः ।
यन्ताराधिपचूडमागमशिरो विश्वाधिकं गायते
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ।।

गोविंदादधिकं न दैवतमिति प्रोच्चार्य हस्तावुभा
वुद्धत्याथ शिवस्य सन्निधिगतो व्यासो मुनीनां पुरा ।
यस्य सङ्गीतपाणीरानतिकृता नान्दीश्वरेणा भवेत्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ।।

विष्णुस्थावरजङ्गमात्मक जगत् स्वामीविरिञ्चाधिको
यत् भक्तेन सहासुरेश्वर रिपुर्युद्धं दधीचेन सः ।
कृत्वाशीघ्रमहोद्विजादपजयं तस्मात् गताऽभूत् भृशं
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ।।

कादीनां च भयङ्करः स्वमहसा क्रूरैश्च कृत्यैर्भृशं
कोपालोजितदानवो नरहरिर्यस्यांश भूतेन सः ।
लोकेशश्शरभेण शिक्षितमदो भूल्लीलयार्धक्षणात्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ।।

विष्वक्सेनमपीन्दिरापतिसमं तं रक्तभिक्षाच्छलात्
संहृत्याथ सभैरवः शशिधरो यस्यांशभूतो जटी ।
ब्रह्माद्यरमरशिक्षकस्य बलिनो विष्णोर्मन्दञ्चाहरत्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सृष्ट्वा यस्त्रिगुणान् विधातृमधुभिः शूलायुधेभ्यः शिवो
दत्वैतानथ तान् गृहीतुमनयोश्शक्त्या किलान्हीनयोः ।
ताभ्यां साकमहोगुणत्रयभृते रुद्राय संयन्ददौ
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ।।

येनापादितमङ्गजाङ्गभसितं दिव्याङ्गरागैस्समं
येन स्वीकृतमब्जसम्भव शिरस्सौवर्णपात्रैस्समम् ।
येनाङ्गीकृतमच्युतस्य नयनं पूजारविन्दैस्समं
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ।।

यथार्थमेव श्रुतसारसम्भवं
ध्रुवं बुवाणेर्थमिमं महावटौ ।
तदा भवत्सत्यबलेन पीपितो
हुताशनश्चन्दन पङ्कशीतलः ।।

एवं पुराणै रखिलैश्च वैदै-
श्शास्त्रगमैर्वैदिकभूषणं सः ।
निश्चित्य शाम्बं शिवमेव तत्वं
विद्वज्जनाग्रे सुतरां व्यराजत् ।।

शाम्भवे स्त्रयी सूक्तिमाल्या प्रतिपादिते
परतत्वे तथा तेन हरदत्तेन धीमता ।।

अथ त्रिपादपीठोत्थवन्हिश्चन्दनशीतलः ।
अभूत्तस्य यथार्थोक्ति फलेन परिपीडितः ।।

एवं पुराणै राम्नायैस्स्मृतिभिर्वैदिकाग्रणीः ।
हरदत्तः परतत्वं हरमेवेतिनिर्णयः ।।

कृत्वाविद्वज्जनाग्रेसौ वासुदेवसुतौ बभौ ।
नत्वां तं शिवमेवेति मन्वानास्ते गृहं ययुः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

व्यतीतायां विभावर्यां सोऽप्यगात् सह्यजातटम् ।
हरदत्तस्ततः स्नात्वा कृत्वा सन्ध्यादिकाः क्रियाः ।।

कृत्वा शिवार्चनं भक्त्या स्थितस्तत्र जनैर्वृतः ।
अथ मातस्य सहसा समाहूय निजं सुतम् ।।

आलिङ्ग्यमूर्ध्नि उपाघ्राय खेदहर्षाश्रुभिःशुभम् ।
अभिषिच्य च भो वत्स क्षुत्क्षामो नितचरामसि ।।

वत्साङ्गारामितो भोक्तुं एहि त्वं मत् कनीनिके ।
इति मात्रा समाहूतः शिवनिर्माल्यमोदनम् ।।

अभ्भुक्त हृदितं सम्बं चिन्तयन् सर्वगं सदा ।
तदा प्रभृत्यसौ बालः त्रिकालं शिवपूजकः ।।

पश्यन्तन्वाह मीशानं स्तुवन्नास्ते सुखेन सः ।
तदापि ता सुतं श्रेष्टं तच्छक्तिं वीक्ष्य विस्मितः ।।

स भूयः कृतमज्ञानात् ममगः क्षम्यतामिति ।
ततस्ते वैष्णवास्सर्वे तेन साकं तमर्भकम् ।।

तप्तमुद्राधारणेन खिन्नाः पपृच्छुरानतः ।
अस्माकं निष्कृतिः का वा परलोकगतिः कथम् ।।

भविष्यति महाभागा ब्रूहिकारुणिकोत्तम ।
इत्युक्तस्तैर्महाभागो हरदत्तो ब्रवीतिमान् ।।

स्मर्तृभिनिश्चितस्सद्भिः प्रायश्चित्तं विधेहि वः ।
अङ्कितः शङ्खचक्राद्यैः स्वेदेहे देवनायुधैः ।।

त्रिपुण्ड्रधारणादेव भस्मना पूयते नरः ।
सर्वेषां काम्यरूपत्वात् कर्मणामघरूपतः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रायश्चित्तविधानत्वात् सर्वेषां पापकर्मणाम् ।
मुखावाहूरुपत् जानां वर्णान्याश्रमणां तथा ।।

आचण्डालमनुष्याणां भवबन्धविमुक्तये ।
उद्धूलनं त्रिपुण्ड्रं च सदाधार्यं विचक्षणैः ।।

इत्युक्त्वा देवदेवस्य हरदत्तो महामतिः ।
दक्षिणाशा मुखंरूपं हृदि ध्यात्वा समाहितः ।।

पित्रे पूर्वं ततस्तेषां विभूत्युद्धूलनं क्रमात् ।
त्रिपुण्ड्रधारणं पश्चात् रुद्राक्षाणां च धारणम् ।।

पञ्चाक्षरोपदेशं च शिवलिङ्गानि चैव हि ।
तत् पूजाविधिमेतेषां क्रमादुपदिदेश सः ।।

उपदिष्टो वैष्णवाद्या हरदत्तेन सादरम् ।
त्रिकालपूजया स्तोत्रैः निन्युस्ते वासराणि तु ।।

स्तन्यपानोचिते काले प्रसादं परमेशितुः ।.
अवाप्य वेदानखिलानधीत्य च कलास्तथा ।।

पादं करोतीत्यश्रृणोत् शिवलिङ्गमहीपतिः ।
शिवभक्तस्सर्वकालं शिवपादाब्जचिन्तकः ।।

सविस्मयस्तन्निकरं प्राप्य तत् पादपङ्कजम् ।
प्रणम्य प्राह हे नाथ मधुरापुरनायकः ।।

रक्षितुं मां पाण्डयनाथ एवं रूप इहागतः ।
इत्युक्ते नृपतौ तत्र ततो विद्वज्जनोऽवदत् ।।

राजन् त्वयोक्तं यत् सत्यं तन्नोचेदयमर्भकः ।
अनधीत्य कलावादं कुर्यात् विद्वज्जने कथम् ।।

एवं विद्वत् सु सर्वेषु कथयत् सुमनोहरा ।
प्रदुरासी ततो वाणी शिवेन प्रेतरितां शुभाः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यः शिवं नेत्रपद्मेन पूजयामास माधवः ।
स एव रक्षितुं लोकान् शिवभक्तिं प्रकाशितुम् ।।

वेदमार्गान् स्थापयितुं जाते विप्रकुले द्विजः ।
तमेनं नृप जानीहि हरदत्ताख्य देशिकम् ।।

जनस्तां वाचमाकर्ण्य साश्चर्यं प्रीति संयुतः ।
प्रणम्य तत् पादयुगं तुष्टाव श्रुतिरूपिणीम् ।।

आम्नायरूपस्त्व जातः सकाशात् त्रिपुरद्विषः ।
हरदत्ताभिधोग्रामे वयं धन्या विशेषतः ।।

अथ कूपोपि तन्नत्वा द्वितीयमिवधूर्जटिम् ।
क्षेत्राणिवसुवासांसि तस्मै दत्वाब्रवीदिदम् ।।

अन्यः शिवोस्ति यदि ते त्वमेव भगवान् मम ।
तस्मादनाथे त्वद्दासे कारुण्यं मयितन्वता ।।

अथैषभूपतिं प्राह नृपते भुवने त्वया ।
न तुल्येविद्यते लोके तस्मात् शैवी कृपास्ति ते ।।

इत्युक्त्वानन्तरं तस्मै राज्ञे पञ्चाक्षरं मनुम् ।
उपदिश्य ददौ लिङ्गं स्फाटिकं पूजयेति सः ।।

ततो महीपतिस्तुष्टः त्वाचार्य चरणेद्वये ।
विकीर्यस्वर्णपुष्पाणि यथेष्टदक्षिणां ददौ ।।

आचार्यः शिवभक्तेन तेन राज्ञा महात्मना ।
उपासितः कुबेरेण परमेश इवाऽऽभवत् ।।

तत् काले भसितं दत्वा प्रयुज्याशिषमादिशत् ।
शिवपूजां कुरुष्वेति शिवकैंकर्य कद्भव ।।

ततस्सराजानुज्ञातो गृहं गच्छेति सादरम् ।
लब्ध्वा कृपांगुरोस्तस्मात् स्वपुरं गन्तुमुद्यतः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रदक्षिणीकृत्य गुरुं तदीयपादारविन्दद्वितयं प्रणम्य ।
स्मरन्महेशं चतुरङ्गसेनया समवृतस्त्वां नगरीं विवेश ।।

।। इति भविष्यत् पुराणे शिवभक्तमाहात्म्ये सप्तपञ्चशोऽध्यायः ।।

उपमन्युः -

आचार्यो हरदत्ताख्यो ब्रह्मचार्यव्रतं चरन् ।
वलक्षदन्तकौपीन यज्ञसूत्र विभूतिमान् ।।

दण्डि कमण्डलुधरोधृत कृष्णाजिनाम्बरः ।
मौञ्जीधृक् पाणियुगलोधृतदर्भश्शिखी वटुः ।।

धृतभूयिष्ट रुद्राक्षः प्रथमाश्रममाश्रितः ।
कालद्वये समिद्धोमं कुर्वन् लोकगुरो कुले ।।

स्वाचार्य दक्षिणामूर्तेस्समीपे सर्वदा वसन् ।
ब्रह्मचर्येण तेनायमृषीणामनृणो भवत् ।।

अपाकर्तुं पितृणं गर्हस्थ्यं श्रयितुं गुरुः ।
गोदानं षोडशे वर्षे स्नानकद्रुतमातनोत् ।।

तस्मिन् कंसाकरे कश्चित् सुप्रतीकः इति श्रुतः ।
सदाचाररतश्शान्त पञ्चयज्ञपरायणः ।।

त्रिकालं शिवपूजायामासक्तश्रोतभस्मना ।
उद्धूलनं त्रिपुण्ड्रं च धारयन् शिवभक्तितः ।।

रुद्राक्षधारणं चैव तथा पञ्चाक्षरीजपम् ।
कुर्वन् प्रदक्षिणं शम्भोः नमस्करादि सत्क्रियाम् ।।

शिवभक्तेषु शिवभूजां कुर्वन् कालं निनाय सः ।
वातुलान्वयवाराशिपूर्ण चन्द्रोदयस्य सा ।।

कमलाक्षिति विख्याता पत्नी तस्य मनोरा ।
अरून्धत्यनसूयादिपातिव्रत्यातिशायिनी ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रूपयौवन सम्पन्ना भर्तृशिश्रूषणे रता ।
बभारगर्भं तेजिष्टं वसुं वसुमतिर्यथा ।।

ते नैव कृशमध्यापि पृथुमध्या बभूव सा ।
पितागर्भाभिवृध्यर्थं गर्भसंस्कृतिमातनोत् ।।

तस्यां कालेन सञ्जाता दुहितानंत लक्षणौ ।
इन्दिरांशेन सम्भूता सर्वलावण्य शेवधी ।।

आसीज्जोतोत्सवे तस्या भूयान् मङ्गलसम्भ्रमः ।
स्नात्वा पिता वीजदानं ब्राह्मणेभ्युपकार सः ।।

ददौ शङ्करभक्तेभ्यो यथोप्सितमसौ धनम् ।
हृद्यमाकर्ण्य सम्पातैर्मङ्गलस्नेह धारयाः ।।

श्रीभृत्यानां मुदं कुर्वन् स चकार महोत्सवः ।
स तदा पोषयामास भागधेयस्य कन्दलीम् ।।

मूर्ता मिवेन्दिरां साक्षात् आनन्दलहरीं सुताम् ।
जातकर्मपिताके पश्चाद्वै नामकर्म च ।।

तस्याः कमलवल्लीति नामासीत् प्रथितं भुवि ।
साक्रमेणांकणे चक्रे जानुम्यां परिरिङ्खणम् ।।

चञ्चलनूपुरा हंस वाचाल मणिकङ्कणा ।
धूली पालीभिरालीनां निकुरूम्बकरञ्चिता ।।

मणिपाञ्चालि द्वन्द्वकृतोद्वाहोत्सवक्रमात् ।
अक्षीबलानलीलाभिराततानमुदं पितुः ।।
सखीहस्त समालंबा विहितभ्रम विभ्रमा ।।

गोलकन्तुक लीलाभिः रेमे चित्रकथोक्तिभिः ।
माणिक्कमेखलाबद्ध नानाचित्र दूकूलिका ।।

पुष्पापचितिमातेने आरामेषु सखी युता ।
पुरिते मधुना पद्मे निजाकारं विलोक्य सा ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रीराविरासीत् मौग्ध्येन बाला सा नतिमातनोत् ।
किमयं हरिणी मुग्धा किमियं च रिंहंसिका ।।

प्रतिपच्चद्ररेखा किमियमानन्दकंदके ।
कारणे नव तीर्णी किं कमलद्विज वेश्मनिः ।।

इति स्तुतायां तु जनैर्हष्टिभिरादरात् ।
एतस्मिन्नन्तरे राजा शिवलिङ्गाह्वयो महान् ।।

आश्चर्यं दृष्टुकामोऽसौ बहुद्रव्येण संयुतः ।
दृष्ट्वाचार्यं नमस्कृत्य कृत्वास्तोत्रैरनेकधा ।।

स्वर्णपुष्पैस्समभ्यर्च्य पादयोश्च विशेषतः ।
वासुदेवाभिधं तस्य पितरं प्राह भूमिपः ।।

विवाहोचितकालोऽयं आचार्यस्येति वादिनी ।
नृपे तत्र स्थिते प्राह सुप्रतीकद्विजो नृपम् ।।

मम कन्यां प्रदास्यामि हरदत्ताय हे नृप ।
उद्योगः क्रियतां शीघ्रं शुभस्य नविलम्बनम् ।।

चकार्यमित्युदितो राजा चकारोत्सवमादरात् ।
अथ दैवज्ञमाहूय विवाहान्हि विनिश्चिते ।।

विवाहमङ्गलं दृष्टुं पिता पुत्रस्य सर्वतः ।
कल्याणात् पादकान् सर्वान् प्राहिणोत् बान्धवान् प्रति ।।

व्रतादि गो दानादीनि ब्राह्मणैस्सहितस्तदा ।
चकारास्य कुमारस्य वासुदेवस्तु तत् पिता ।।

रम्भापुगकृतस्तम्भ पताका तोरणादिभिः ।
अलङ्कृता प्रत्यगारं शोधिताः पुरवीथिकाः ।।

सौधानवसुधालिप्ताः केतुमालोपशोभिताः ।
हर्षपुराच्चितैः पौरैरभितः शोभितापुरी ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

द्रविणान्युपदार्हाणि क्षौमाण्यभराणानि च ।
आदाय बान्धवास्तस्य कल्याणगृहमाययुः ।।

उपदाभिर्जनपदा दागताभि रनेकशः ।
निरन्तरं तत् समन्तात् कान्तं कल्याणमन्दिरम् ।।

समहाध्वर सम्भारतुल्यं कल्याणकल्पनाम् ।
अनल्पां कल्पयामास शिवलिङ्गमहीपतिः ।।

महोत्सवं प्रतिगृहं सालङ्कार समुज्वलम् ।
अभवत् विभ्रवोदारं तत् परं भाव तत् परम् ।।

सकल्याणं ब्राह्मणादि तर्पणाद्यङ्कुरार्पणम् ।
उद्वाहार्थं कुमारस्य विधिवत् सद्विजो व्यधात् ।।

आहूतानागतान् दिग्भयो बान्धवानितरानपि ।
स श्रद्धाभक्ति संयुक्तमुपचारैरूपाचरत् ।।

सुप्रतीकस्ततश्चक्रे सालङ्करमसम्भ्रमम्।
सवितानं विवाहस्य दुहितुस्सतदोत्सवम् ।।

कलधौत निभोत् सेधान् सौधान्नवसुधार्पणात् ।
प्रसादयत् सभीतिश्च पताका तोरणादिभिः ।।

वितान सन्तानवतस्सततं ग्रथितः स्रजः ।
मण्टपान् मण्डनवतः क्षिप्तालङ्कारणां कणात् ।।

प्रदीपपूर्ण कुम्भादि शोभितद्वार वेदिकाः ।
कालागरूत्थधूमालि वासिताः सकलग्रहाः ।।

तत् बान्धवाश्च सुहृदा सम्भृतपाभृतोदयः।
कलत्रपुत्रपौत्रैश्च रत्नचित्रविभूषणैः ।।

सार्धमुद्वाहोत्सवार्थं प्रीतास्सतद्गृहमागताः ।
नदत्सुभद्रवाद्येषु वेदघौषैकपूर्तिषु ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धूपैर्वासितदिग्भागैः कालागरुभवैस्समम् ।
मूर्चाम इति धूम्रेषु प्रज्येषुपतिमन्दिरम् ।।

आपतुसुदिग्म्योप्यष्टाभिः सत्सुप्राभृतवाणिषु ।
कोशशाला सुपूर्णासु रत्नहेमांशुकादिभिः ।।

संभृत्योदाहसम्भारान् विप्रावेदविधानतः ।
चतुर्मुखसमास्तत्र चक्रे पुण्ययाहवाचनम् ।।

भूसुराः पूर्वदिवसे विवाहप्रस्तुतात् दिनात् ।
त्रैय्यंबकेण मन्त्रेण रक्षाबन्धं गुरुर्व्यधात् ।।

ते तस्य विधिवत् चक्रुः समावर्तनसत्क्रियाम् ।
दिशन् जनेभ्यो द्रव्याणि तत्र मित्रैस्सहास्तसः ।।

मध्वरामानुजादीनां सिद्धान्तध्वान्तमेव हि ।
निराकरोत् तमेनैशं यथा भानुः स्वदर्शनात् ।।

दृष्टं साशा इव ह्यासन् गुरु वैवाहिकोत्सवम् ।
भास्वत्प्रसाधनभृतो ब्रभुर्हेमोज्वलां वरः ।।

समाजेऽब्धि समे तस्मिन् वेदघोषोपबृह्मिते ।
दर्भैः परिस्तृतो वन्हिः प्रदक्षिणा शिखोबभौ ।।

पुष्पधूलीकृतोद्धूला श्रृङ्गरुद्राक्षधारिणः ।
सद्भक्ता इव तत्रासन् मरुतो मन्दचारिणः ।।

अन्नैः षड्रससम्पन्नैः जनाः प्रारब्दभोजनाः ।
व्यञ्जनाव्यञ्जनरसा श्लाघावचननिस्वनाः ।।

अदृष्टपूर्वसर्वान्नव्यञ्जनास्वादमोदिताः ।
तृप्ताहारहरेत्यूचुः श्रीभृत्याश्च सुपूजिताः ।।

विधाय दुहितुस्सोपि हित्यांकुरविधानतम् ।
प्रतिपाद्यागतिं तस्थौ परिणेतु प्रणष्टधीः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वासुदेवोऽपि सूतोऽस्तु कृताभ्युदयकौतुकः ।
महार्हं च विवाहार्थं अलङ्कारमकारयत् ।।

संस्थाप्य वेदिमध्ये तु महास्तरणसंवृते ।
तस्य कालस्यानुकूले दुकूले परिधाप्य तम् ।।

अङ्गरागं साङ्गरागं गुरोरङ्गेषु लेपयेत् ।
मालाभिरनुकूलाभिरलङ्कृततनो गुरुः ।।

मौक्तिका हंसकं पादे पूर्णेन्दुमिव वन्यधुः ।
काञ्चनं च कटीसूत्रं अङ्गुलीयकमङ्गुलौ ।।

अङ्गदेरत्नखचिते कटके मणिभूषिते ।
चण्डांशु कुण्डलयुगं विलसत् गण्डमण्डलम् ।।

तस्याननं महाभानु भानुदीप्तमिवांबरम् ।
त्रिपुण्ड्रभस्मधवलललाटं तन्मुखं बभौ ।।

सान्द्रचन्दिकचन्द्रार्धलीलांतमिव पङ्कजम् ।
सुवर्णमुक्तारत्नाङ्गमकुटं प्रकटद्युतिः ।।
ज्ञानमूर्धाभिषिक्तस्य मूर्ध्नि ते निदधुर्गुरोः ।।

स्वबान्धवैरेवमलङ्कृतोऽपि
विलोकयन् लोकदृशां महोत्सवः ।
अलङ्कृतैरप्यमलामलङ्कृतिं
ललाटतः श्रीहसितं दधार सः ।।

दृश्यमानो नन्द्यमानः स्तूयमानश्च सज्जनैः ।
गुरुमग्नीश्वरं नत्वा श्रीभृत्यं नतिमातनोत् ।।

आन्दोलिकामथारुह्य गुरुर्गुरु पुरस्सरः ।
ग्रामं प्रदक्षिणं कर्तुं निर्ययौ निलयान्निजात् ।।

ततस्सर्वेऽपि कल्याणदर्शनोद्दीप्त कौतुकाः ।
यानान्यारुरुहुस्सैनैः समुपेताः परिच्छदैः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वेणुवीणागीतनादैः विप्राशीर्वचनस्वनैः ।
शङ्खकाहलभेरीभिः दिङ्मुखं मुखरीकृतम् ।।

तदा क्षौमपताकाभिराच्छादितमभून्नभः ।
दोधूयमानैर्बहुभिः च्छादिताश्चामरैर्दिशः ।।

अग्निहोत्रं पुरस्कृत्य धर्मदारैस्समन्विताः ।
श्रौततन्त्रविदस्तत्र प्रययुस्सोमपायिनः ।।

श्रीमदिगानानि गायन्तः शिवलाञ्चनशोभिताः ।
कुमारोद्वाहकल्याणं द्रष्टुं श्रीकिङ्करा ययुः ।।

तस्योद्धृत बभौ छत्रं आवृता व्यजनादिभिः ।
महाब्धिलहरी मध्ये चन्द्रबिम्बमिवोदितम् ।।

अतिश्वेतानि धौतानि चामराणि समं ततः ।
जालानी व च पेनानां वायुर्लोलानि रेजिरे ।।

प्रसाधिता सुवीथीषु गुरौ याते पुरः प्रजाः ।
उपहारं ददुः पौरानालिकेरादिकं फलम् ।।

गुरुस्वमुत्सवं द्रष्टुं मौद्गतैरमितैर्जनैः ।
श्रीभृत्यैर्बद्धभिश्चान्यैः महोद्वाहालयं ययौ ।।

विद्वद्भिः बान्धवैः प्रीतैः प्रत्युद्यातः प्रसन्नधीः ।
आलयं सुप्रतीकस्य निवेशहरदत्तकः ।।

भूषणानामलङ्कारः वपुर्धरगुरुस्ततः ।
आन्दोलादवतीर्यासौ भूतलास्तिर्णवाससा ।।

यथा गुरुस्तथोपेत्य आतस्थौ हैममासनम् ।
सुप्रतीकोऽपि तां कन्यां अलङ्कृत्य विभूषणैः ।।

डोला यज्ञ समीपे तु मातुलां सेन्यवेशयत् ।
अन्योन्य मालां सम्प्राप्य गुरुश्चवरवर्णिनी ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

डोलायन्त्रे निवेश्याथ डोला डोलनयां भृशम् ।
रेजतुर्गानलीलाभिः उभयोर्वंशगाननः ।।

अवरुह्य तदा त्वेतौ श्वश्रुप्रणिहितैर्जनैः ।
पयसा क्षालनं प्राप्य तस्थतुः कन्यका वरौ ।।

आर्यास्तौ परितो नार्यः कृत्वा धाराम्बुमण्डलम् ।
कृतनीराजनादीप ययुर्वध्वस्तदग्रतः ।।

गुरुर्बन्धुजनोपेतः प्रापदुद्वाहमण्डपम् ।
वाद्यघोषैर्मुखरितं वितानाद्यैरलङ्कृतम् ।।

आस्थितेरत्नपर्यङ्के वरेवेदविदांवरे ।
हर्षौमूर्ता विवायातौ कन्यायाः पितरौ तदा ।।

सुप्रतीकः स्वयं पत्नी करस्थकरकाम्भसा ।
इयमस्मै कुमाराय कन्या दत्तेति तत् पिता ।।
धाराजलं ददौ तस्य करेगोत्रं निजं वदन् ।
कन्या नित्ये तत् समीपं सालङ्करणकौतुका ।।

श्वशुरेण पयोदस्य कालेनैवक्षणप्रभा ।
सुकुमारं कुमाराङ्गं चारुवेषं वधूदृशाः ।।

अनिमेषास्तु पश्यन्तो मर्त्या ययुरमर्त्यताम् ।
तत्रार्पितविता श्रीःविद्रुमस्तम्भ शोभितः ।।

मङ्गलोद्घोषितो रेजे महानुद्वाहमण्टपः ।
उच्चारितेषु मन्त्रेषु शङ्खघोष समृद्धिषु ।।

तत्र न्यस्त विवाहाग्निं सचाहौषीदुदार्चितम् ।
सोदरार्पितलाजौघ पूरिताग्रकराञ्जलिः ।।

मुमोचांजलिना लोकान् अग्नौ विललसा वधूः ।
वरः करेण कन्यायाः गृहीत्वा करपल्लवम् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अष्टमूर्तिमग्निं परिधाय प्रदक्षिणम् ।
ससारोचितकर्माणि सहैवानघयानया ।।

साक्षात् त्रयक्षपदाम्भोजं प्राप्यामीति मतिं दधौ ।
एवं विवाहस्संवृत्तो हरदत्तगुणैर्महान् ।।

जनास्तमुत्सवं दृष्ट्वा परां प्रीतिं प्रपेदिरे ।
समस्तलोकरक्षार्थं अवतीर्णोऽयमागतः ।।

हरदत्त इतीवासीत् बहुलः कहाली ध्वनिः ।
गुरोः कन्या पुरस्यास्य श्रुत्वा काहलनिस्वनम् ।।

अलङ्कृतगृहद्वाराः पौरानिर्ययुरुन्मदाः ।
वीक्ष्यायास्यतीनाथं द्रक्ष्यामो वयमुत्सुकाः ।।

कर्पूरलाजान् विकिरन् हृष्टाद्विजकुमारिकाः ।
गन्धतोयैः सिक्ततलावीथीश्शोधित शङ्करः ।।

परिणेताव्यतीयाय पताकान्तार्हितातपः ।
तत्र मर्त्याकरोत् कीर्णपुष्पकर्पूरधूलयः ।।

गन्धपङ्कान् क्षालयन्तः समीरास्तं सिषेविरे ।
यथा पुण्यां कुरुं साङ्गं ज्ञानं सावयवा यथा ।।

गुरुं प्रत्युद्यब्रुर्नाप्योधृतमङ्गलदीपिकाः ।
अथ बध्वा समारूह्य मुक्तांदोले सदेशिकः ।।

प्रययौ तूर्यघोषेण स्वस्तिघोषेण सर्वतः ।
ग्रामं प्रदक्षिणी कृत्य देवतायतनानि च ।।

अग्नीश्वरालयं गत्वा प्रणम्य परमेश्वरम् ।
पार्वती सहितं तस्मै पुष्पाञ्जलिसमर्पणम् ।।

कृत्वा प्रदक्षिणीकृत्य निर्ययौ देवतालयात् ।
आन्दोलं पुनरारुह्य वध्वा सह सदेशिकः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शिबिकायां ययौ तत्र बर्हिवेद्यां सह स्त्रिया ।
अवरुह्यान् भूयासाववारार्तिकविधिं गुरुः ।।

गृह प्रवेशनं कृत्वा होमकर्म पुरस्सरम् ।
ब्राह्मणान् भोजयित्वाऽऽन्ते वाचयित्वाशिषश्शुभाः ।।

तेभ्यो यथोप्सितां दत्वा दक्षिणां च विसृज्य च ।
तदारभ्य तया बध्वा सहकर्मकरोऽभवत् ।।

।। इति भविष्यत् पुराणे शिवभक्तमाहात्म्ये एकोनषष्टितमोऽध्यायः ।।

उपमन्युः —

सततः प्रातरुत्थाय ध्यात्वा सात्रं त्रिलोचनम् ।
तत आवश्यकं कृत्वा दन्तधावनपूर्वकम् ।।

स्नात्वा सन्ध्यामुपासित्वा गायत्री वेदमातरम् ।
जप्त्वा हुत्वा साम्बमूर्तिं पूजयामास सादरम् ।।
विचार्यगृहकृत्यं च मौनीभूत्वा ततः परम् ।
नत्वा सुदर्शनाचार्य श्रीमदग्नीश्वरं ततः ।।

श्रीमत् त्रिकोटिकानाथं वटारण्येश्वरं ततः ।
गोमुक्तीश्वरनामानं श्रीमदापत् सहायकम् ।।

प्राणेश्वरालयं पश्चात् श्रीमदाम्रवनेश्वरम् ।
पुनरग्नीश्वरं नत्वा मध्याह्नस्नानमाचरन् ।।

माध्यान्हिकं ततः कृत्वा नियमेन समन्वितः ।
ब्रह्मयज्ञं ततः कृत्वा पूजयामास शङ्करम् ।।

शिवनिर्माल्यतः कृत्वा वैश्वदेवं ततः परम् ।
द्वारावलोकनं कृत्वा सम्पूज्यातिथिपूर्वकान् ।।

कृत्वा प्राणाग्निहोत्रं च शिवनिर्माल्यतस्तथा ।
प्राणाग्निहोत्रं यः कुर्यात् शिवस्यैव प्रसादतः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सीसे सिन्धेऽग्निहोत्रस्य फलं प्राप्नोत्यसंशयः ।
भुक्त्वा यथेष्टं ताम्बूलं ब्रह्मणेभ्यो ददौ ततः ।।

अथो शिवपुराणानि पठित्वा ध्यानपूर्वकम् ।
सायं सन्ध्यामुपासित्वा हुत्वाग्नीशं प्रणम्य च ।।

शिवपूजां ततः कृत्वा वैश्वदेवमथाचरत्।
अतिथियागतैस्साकं भुक्त्वा ताम्बूलमुत्तमम् ।।

नत्वा तत् ब्राह्मणेभ्यो वै चर्वित्वाथ स्वयं च हि ।
कुर्वन् शिवकथालापान् ब्राह्मणैस्सहकीर्तयन् ।।

ध्यात्वा साम्बं महादेवं वात्स्यायन विधानतः ।
शयित्वा रात्रिसूत्रं च शयित्वा मृदुतल्पके ।।

ऋतु कालाभिगामी स्यात् स्वपत्न्या मद्वयं ततः ।
एवं गार्हस्थ्यमतनोत् शम्भुभावनया सदा ।।
कदाचिद्रुद्रगणिका नित्यं सेवापरायणाः ।
अग्नीशनीराजनतो नायातास्समये तदा ।।

इत्यग्नीशपुरोभागप्रासादाग्रेऽधिकारिणा ।
आरोपिताश्च गणिका अपराधस्य शान्तये ।।

रात्रिर्गतापरेद्युस्ता आमध्याह्नं तथा तपे ।
पीडिताः क्षुधितास्तस्थुः मोचकोपि न कोपि च ।।

चुक्रुशुः क्षुधिताः केश्चित् जलमोचनपीडया ।
रुदन्तीञ्च तथा कांश्चित् हरदत्तस्तदागतः ।।

मध्यान्हं समतिक्रम्य पश्चात् सेवार्थमागतः ।
दृष्ट्वाचार्यं तु ता स्वामिन् मोचयाशु च नः प्रभो ।।

इति सर्वाश्च सम्भूय रुदंत्यश्चुक्रुशुर्भृशम् ।
किमेतदिति पप्रच्छ समीपस्था व्यजिज्ञपन् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तद्वाक्यं सकलं तस्मै श्रुत्वा वृतं तदीयकम् ।
भूमौ पतित्वा भ्रांत्वा च स्वोदरे ताडयन् भृशम् ।।

शिरोपि ताडयन् स्वस्य हरदत्तो रुदन् मुनिः ।
पीडया मूर्च्छिते धृत्वा भूमौ वेगात् पपात च ।।

केचित् दृष्ट्वा विलोक्येतं वेश्या स्वस्वेदृशी तदा ।
कृत इत्यपहासोक्त्या मुहुरेनं हसन्ति च ।।

किमर्थमिति निश्चेतुं अशक्यमिति केचन ।
साधवस्तान् निवार्याशु बलात् कारेण वै तदा ।।

ततस्सर्वे समागत्य किमर्थं रुद्यते त्वया ।
इत्यपृच्छन् तदाचार्यो दासीनां भाग्यमुत्तमम् ।।

यदा यदा नागतास्ता सेवितुं पावकेश्वरम् ।
तदा तदाधिकारीति शासनं कुरुते किल ।।

येन केन प्रकारेण तत् तत् काले महेश्वरम् ।
सेवन्नेहि बलेनापि तस्मात् भाग्योत्तरास्तुताः ।।

एतावत् कालमद्यत्वं किमर्थं नागतः शिवम् ।
सेवितुं त्विति शास्तामेनकोप्यत्र हि दृश्यते ।।

प्राहृत्यस्वयमात्मानं रोदिमित्यभ्यभाषत ।
एतत् श्रुत्वाधिकारी च मुमोच गणिकास्तदा ।

हरदत्तं तु ते सर्वे प्रशशंसुर्मुदान्वितः ।
हरदत्तो यथापूर्वं पावकेशं स्वयंभुवम् ।।
सेवित्वा गृहमायाताश्शिवपूजार्थमादरात् ।

ऋषयः —

प्रातःकालेनागतः किं हरदत्तः शिवालयम् ।।

यतो वेश्या जनाः प्रातः स्ववृत्तं न व्यजिज्ञिरे ।
एतन्निस्संशयं ब्रह्मन् उक्त्वाशंकान्निवारय ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उपमन्युः —

मोचयिष्यति पश्चान्तोह्यधिकारीति निश्चयात् ।
गणिका हरदत्तेन प्रातःकाले शिवालये ।।

स्ववृत्तं नोचिरे पश्चात् अपराह्णे व्यजिज्ञपन् ।

ऋषयः —

मध्यार्जुनेश्वरं तन्तु किमर्थं नागतो मुने ।।

हरदत्ताचार्यमुनिरित्येतद्वदनोऽधुना ।

उपमन्युः —

पौर्णमास्याममायां च गत्वामध्यार्जुनस्थलम् ।।

स्नात्वा कावेरिकातोये ब्रह्महत्यादि शोधने ।
मध्यार्जुनेश्वरं नत्वा नत्वांबां भक्तिपूर्वकम् ।।

आज्ञागणेश्वरादींश्च नत्वा कल्पकनायिकाम् ।
प्रणम्य पावकेशानं मध्याह्ने स्वगृहं ययौ ।।

तदानीमान्हिकं कर्म कृत्वाचार्यो महेशितुः ।
अभिषेकं शङ्खतोयैः कुर्वाणश्शुनकस्तदा ।।

कश्चिदागत्य शंखस्थजिह्वा यापातुमुद्यतः ।
तत् दृष्ट्वाव श्रुतेरर्थं ज्ञात्वा तस्मै ददावयम् ।।

शङ्खतोऽयं च तत् पीतं शेषाम्भो हरमूर्धनि ।
अभिषेकं च कृतवान् निश्शङ्कमनसा मतः ।।

एतत् आश्चर्यमालोक्य तत् समीपगता जनाः ।
किमेतदुचितं ब्रह्मन् ब्रूहीत्याचार्यमूचिरे ।।

यश्शिवः स्वयमायातो यदि पातुं सवाच्छति ।
किं कर्तव्यं मयेत्याह तत् श्रुत्वाद्विजपुङ्गवाः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आलोक्य तस्य सुदृढां सर्वत्र शिवभावनाम् ।
आचार्यं पूजयित्वा ते विस्मिता स्वगृहं ययुः ।।

अथ कालेन तत्पत्नी भवानीवेन्दुशेखरात् ।
गर्भं बभार सहसा वह्निगर्भमिवारणिः ।।

तथैव ववृथे गर्भो मासे मासे क्रमेण तु ।
सीमन्तादीनि कर्माणि तत्तत् काले ततान सः ।।

सासूत तनयं बाला विशाखमिव पार्वती ।
तस्य नाम पिता चक्रे वन्हीश्वर इति द्विजः ।।

ततः क्रमेण सञ्जाताः पुत्र सप्तमहौजसः ।
महादेवो नीलकण्ठः शङ्करश्चन्द्रशेखरः ।।

शम्भुर्मध्यार्जुनेशश्च तथा गोवट्ठु नायकः ।
अन्ये द्वे कल्पकाख्येति मीनाक्षी चेति विश्रुते ।।

जाते सर्वे शिवे भक्ता भस्मरुद्राक्षधारिणः ।
शिवलिङ्गार्चनरताः सदारुद्रजपादृताः ।।

पञ्चाक्षरजपासक्ताः पित्रोशिभूषणे रताः ।
सदा सत्कर्म निरताः वेदशास्त्रविचक्षणाः ।।

एवं विधैस्सुतैस्साकं गार्हस्थ्यं कर्मचाखिलम् ।
पुत्राणं वैदिकं कर्म चकारश्शिवशासनात् ।।

उभयोः कन्ययोश्चापि विवाहं कृतवान् द्विजः ।
कुर्वन् शिवार्चनं नित्यं त्रिकालं सम्यगादरात् ।।

यः श्रृणोति सततं महेशितुः
भक्तवर्य शुभसूचितां कथाम् ।
श्रावयेत् फठति वा महीसुरान्
प्राप्नुयात् शिवपदं सदास्तु वः ।।

।। इति भविष्यत् पुराणे शिवभक्तमाहात्म्ये षष्टितमोऽध्यायः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उपमन्युः —

ततः कदाचित् नृपतिः शिवलिङ्गाभिधः सुधीः ।
अग्निश्वरस्य सन्तोषं सादरं कर्तुमुद्यतः ।।

अग्नीश्वरायार्पयेति गुरुहतदुत्कूलकम् ।
देहीति प्रेषयामास द्विजं कञ्चन भूपतिः ।।

राज्ञादत्तं दुकूलं तं तदा य द्विजपुङ्गवः ।
अग्नौ जुह्वन्तमाचार्यं ध्यात्वेशं प्रणनाम सः ।।

नमन्तं पादयुगले तमुत्थाप्य स देशिकः ।
कृत्वाशिषं वसेत्युक्त्वा प्रददावासनं ततः ।।

कृत्वासने सद्विजोऽपि नृपदत्तं महात्मने ।
दत्वा दुकूलं रुचिरं अग्नीशाय समर्पय ।।

इत्युक्तवती तद्वस्त्रं वीक्ष्यमाणेंतिके द्विजे ।
आदाय तस्मादग्नीशं अग्निं ध्यात्वा जुहाव सः ।।

निक्षिप्तमात्रे तद्वस्त्रमदहद्वह्निरर्चिषा ।
क्षणेन तद्विलोक्या सा वनुज्ञतश्च तेन सः ।।

गत्वा नृपान्तिकं तस्मै तद्वृत्तं प्राह भूसुरः ।
तदाकर्ण्य नृपो वाक्यं सर्वज्ञोस्मत् गुरुः किल ।।

केनादहत् तत् विज्ञातुं इति तस्यान्तिकं ययौ ।
आचार्याङ्घ्रिद्वयं पुष्पैः सौवर्णैः प्रतिपूज्य च ।।

आनन्दबाष्पैरासिच्य नमश्चक्रे महीपतिः ।
उत्थाप्य भूपं हस्ताभ्यां पावनाभ्यां सपर्यया ।।

शिवस्यालिङ्ग्य पप्रच्छ कुशलं शिष्यमादरात् ।
धर्मादिफलमेतस्मिन् असदारिद्रनाशने ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

निमज्जतस्त्वत्करुणा समुद्रे मे शुभंकुतः ।
मया दत्तं तद्दुकूलं अर्पितः परमेश्वरे ।।

समर्पितं मयेत्युक्त्वा तेन साकं शिवालयम् ।
नत्वा तद्दर्शयामास शिवलिङ्गमभीक्षिते ।।

येन दत्तं तदालोक्य क्षौमं भूपः सविस्मयः ।
गुरुपादौ प्रणम्याहं क्षमस्वेति पुनः पुनः ।।

दृष्ट्बाल्येपि ते नाथ महिमानं विमोहितः ।
इत्युक्त्वाऽऽनंदजाश्रूणि मुमोच सहसा नृपः ।।

समीक्ष्यभूपमाचार्यः प्राह साम्बे गुरौ समा ।
भक्तिरस्ति भवेत्कृत्यं तव वह्नीश तुष्टये ।।

इत्युक्त्वा तस्य कालेऽसौ भूतिं दत्वाऽऽशिषं गुरुः ।
कृत्वा पुरव्रजेत्येनं अनुज्ञापितवान्मुदा ।।

अथ भूपोऽपि सन्तुष्टो गुरुपादौ प्रणम्य सः ।
दत्वा वासांसि रत्नानि जगाम स्वपुरं प्रति ।।

आचार्योऽपि शिवं साम्बं सुताभ्यां गणनायकैः ।
युक्तं मनोवाक् तनुभिः यजन् स न्यवसत् सुखम् ।।

तस्मिन् काले द्विजः कश्चित् फालालदृढ बन्धितम् ।
चिक्षेप कुत्स्यान्तरिते प्रदेशे वत् सकोपरि ।।

सगतायुरभूत् वत्सः स तं प्रेक्ष्यातिदुःखितः ।
हा हन्तवत् सो निहतो मयेत्याह स हि द्विजः ।।

पश्यज्जनास्ते निहतं दृष्ट्वा कर्म च गर्हितम् ।
विचिन्त्य गोघ्नोयमिति निनिन्दुस्तस्य दर्शनम् ।।

अत्यन्तखेदमापन्नो दुष्कृतेन निजेन सः ।
निषिक्तक्षारकैर्वृत्त इव वाक्यैर्जनैरितैः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अस्य पापस्य शान्त्यर्थं तूर्णमेत्य मठं द्विजः ।
तत्र स्थितान् प्रणम्येदं कर्मठान् प्राह भूसुरान् ।।

भो ! भो ! तपोधनास्सर्वे दैवात् गोत्वत् सधातकम् ।
अज्ञानतस्तत् विमुक्तं यूयं मां कुरुताधुना ।।

तेतद्वाक्यं समाकर्ण्य कुत्सितास्तद्विलोकने ।
अस्मात् स्थलात् विनिर्गत्य मुक्त्वा पश्यन् दिवाकरम् ।।

सद्विजोऽपि शुचादग्धः पिशाचसमवेषवान् ।
पथि गच्छन् ददर्शाऽऽथ दैवादग्नीश्वरं परम् ।।

तद्दर्शनफलेनास्य प्रसन्नमभवन्मनः ।
अथाविरासीत्तस्याशु शेमुषी हरदत्तकः ।।

आचार्यः पापशान्तिर्मे करोतीति विनिश्चितः ।
अन्या साध्यं कृतं तेन कृत्यद्वयमनुग्रहात् ।।

शिवस्य बाल्येविद्याप्तिस्तप्तलोहस्थितिः परा ।
इति निश्चित्य तत् गेहं प्रविशन्नेव सद्विजः ।।

देहल्या ताडिते मूर्ध्नि शिवेति द्विरुवाच ह ।
गुरुराकर्ण्य तद्वाक्यं मग्नस्सन्तोषयागिरे ।।

को महात्मागमत् गेहमिति प्रत्युद्ययौचतम् ।
तं महान्तं द्विजं दृष्ट्वा प्रणनाम प्रहर्षवान् ।।

उत्थाय गाढमालिङ्ग्य जगादेदं वचो मुदो ।
शिवभक्ताग्रगण्यस्त्व यद्यागन्तासि मे गृहम् ।।

अहं धन्योऽस्मि मद्गेहं धन्यमासीदनन्तरम् ।
इत्युक्त्वा सुकृती तस्मै दत्वा विष्टरमादरात् ।।

सत्कारमातनोत् सोऽपि प्राप तुष्टिं च साध्वसम् ।
तडस्तदत्त प्रस्यांमी त्युपविष्ट्येव चिन्तयत् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रुत्वा शिवशिवेत्युक्तं मया तन्महिमादिकम् ।
अदर्शयित्वा मत्पापं निष्कृतिर्नास्ति चेति वा ।।

इति खेदादयं मुञ्चन् बाषां तु हरदत्त ते ।
पादपद्मगतोस्म्यद्य शरणं मम वायुना ।।

एवं वदन्तं तं वीक्ष्य कारुण्यामृतसागरः ।
हे विप्र ते गो वधोत्थ पापशान्तिरभूद् ध्रुवम् ।।

मुक्तिश्चापि तवेत्युक्तः तं प्रति प्राह भूसुरः ।
कस्मान्महापापशान्तिः मम मुक्तिश्चकेन वा ।।

वदेतिपृष्टस्तं प्राह त्वया शिवशिवेति यत् ।
प्रोक्तं ते नैव ते पाप शान्तिर्मुक्तिश्च ते ध्रुवा ।।

कृपार्णवस्य तस्यै तत् वाक्यं श्रुत्वा स भूसुरः ।
अवाप परमां तुष्टिं रिक्तः प्राप्य यथा धनम् ।।

विश्वास युक्तस्तत् वाक्ये तं प्रणम्य पुनः पुनः ।
उत्थाय नटनं तोषात् गततापश्चकार सः ।।

तदा मठान् विनिर्गत्य द्विजः कश्चित् गुरोर्वचः ।
श्रुत्वा चा सह्यतां प्राप्य तं वीक्ष्येदमुवाच सः ।।

अतिक्रूरं कथं पापं शिवनाम्नालयं व्रजेत् ।
कुक्षिस्थितमयः पिण्डं कथं जीर्येत् कषायतः ।।

पापशान्त्यै तु विद्वत्भिः कीर्तनीयः शिवस्सदा ।
पापिना निष्कृतिं केन ननीताश्शिवनामतः ।।

एव मुक्तः स्मितं कृत्वा विष्णवाद्यैरपि दुस्त्यजा ।
शैवीमाया कथं मुञ्चेदेनमित्याहतं गुरुः ।।

शिवनामविनाश्यानां पातकान मभावतः ।
प्रायश्चित्ततया नोक्तं स्मृतिभिर्नाम कुत्रचित् ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा पाशुपतास्त्रस्य न लक्ष्या मशकादयः ।
शिवनाम्ना न लक्ष्यं स्यात् सर्वेषां सर्वपातकम् ।।

सन्देहमस्मिन्नर्थेहं कुर्यात्तस्य सुखं न हि ।
अज्ञानतो यः कुरुते तद्दर्शनमघापहम् ।।

अस्मिन्नर्थे विवादं त्वं अज्ञानात् कृतवानसि ।
त्वद्दर्शनेकुत्सितोऽहं कर्णमस्मात् स्थलात् व्रजम् ।।

सन्दिश्य शिवनाम्न्येष तेनधिक्कारितस्ततः ।
घोरं पापं च भीतिं च लब्ध्वा प्राप निजं गृहम् ।।

ततो विलोक्यतं प्राह पापं मुक्तं द्विजं गुरुः ।
सन्ततं कीर्तयेशस्य ना मगच्छ गृहं तव ।।

इत्युक्तस्तेन संसृष्टः शिवनामानि कीर्तयन् ।
मठमागत्य तत्रस्थान् ब्रह्मणानाह सद्विजः ।।

महेश कृपया प्राप्त सर्वज्ञत्वादि सद्‌गुणः ।
जगाद हरदत्तो मां निष्पापोऽसीति साम्प्रतम् ।।

ततस्तद्वाक्यमाकर्ण्य ते प्राह तं त्वया कृतम् ।
पापं महत् सशैवाग्र्यः कथं नाशितवान्वद ।।

तैरेव मुक्स्तत् प्राह द्विश्शिवेत्युच्चरन् गुरोः ।
गृहं मां प्राप्त मालोक्य बहुसत् कृत्य सादरम् ।।

भक्तार्तिहन्तुरीशस्य नामायस्मात् त्वयेरितम् ।
तस्मात्ते पापमखिलं नाशं यातं न संशयः ।।

मुक्तो भवत् संसृते रित्युवाच हरदत्तकः ।
इति ते तद्वचः श्रुत्वा परिहासपरायणाः ।।

शिवनामोच्चारणेन धूतपापं बभाषिरे ।
महापापमिदं घोरं गावत्सहननोत्भवत् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy.

ननश्येदिति ते प्राहुः नामोच्चारण मात्रतः ।
तदा कर्ण्य वचस्तेषां तूर्णं गत्वागुरोर्गृहम् ।।

तस्मै विज्ञापयामास स च तं प्राह देशिकः ।
द्विजगत्वा तत् समक्षं तान् प्रति प्राह भो द्विजाः ।।

करणीयः प्रत्ययः किं इति पृष्ट्वाशु तद्वचः ।
मह्यं ब्रूहीति गुरुणा प्रोक्तस्तान् प्रतिनिर्यायौ ।।

गुरु कं तेभ्य आचव्यौ ते चैनं काचमुचिरे ।
अग्नीश्वरस्थ शिलारूपी वृषो महान् ।।

तृणमुष्टिं त्वयादत्तं चरेच्चेत् तव पातकम् ।
नष्टमेव न सन्देहो नामोच्चारणमात्रतः ।।

तैरेव मुक्तस्वरितं गुरोर्गेहं प्रविश्य सः ।
तत्रस्थितं शिवं साक्षात् द्वितीयमिव शङ्करम् ।।

प्रोवाचेदं नमस्कृत्य तैरुक्तं वृत्तमादितः ।
स तान् श्रुत्वा गुरु प्राह विप्रं हे द्विज शङ्करम् ।।

ध्यात्वा हृदा शुद्धतोयैः दूर्वाः प्रक्षाल्य भक्तितः ।
वृषभाय प्रयच्छ त्वं तत् समक्षं विशेषतः ।।

ते नैव मुक्तो विप्रोऽसौ दूर्वास्संक्षाल्य वारिणा ।
मठस्थं तान् समाहूय वह्निशालय माययौ ।।

नत्वा तत्र महादेवं तदग्रे वृषभस्य सः ।
दक्षिणस्यां दिशि स्थित्वा दूर्वास्तस्मै ददावसौ ।।

अष्टमूर्तेरधिष्टानधर्ममूर्ते दयानिधे ।
शिवनामोच्चारणेन गतं चेन्मम दुष्कृतम् ।।

तृणमुष्टिं गृहीत्वे मां चर्वित्वा रक्ष मां सदा ।
प्रार्थितस्तेन वृषभः तस्याभिमुखमास्थितः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्व जिह्वया समादाय दूर्वास्तस्य करस्थिताः ।
अभक्षत् तदाश्चर्यं दृष्ट्वा सन्तोषसागरे ।।

मग्ना महानुभावन्तं प्रस्तुत्य हरदत्तकम् ।
प्रोचुस्तं ब्राह्मणं वीक्ष्य हे विप्रकलुषं तया ।।

गतं त्वं च भवान्मुक्तो न चेत् ग्राववृषस्तृणम् ।
गृहीत्वा भक्षयेत् किं वेत्याहुर्विश्वासमागताः ।।

ततस्त हरदत्तं तं विनिश्चित्य महेश्वरम् ।
तत् समीपमुपेत्यास्मै साष्टाङ्गप्रणतिं मुदा ।।

शक्रस्तं प्रशशंसुस्त्वं साक्षात् देवः पिनाकधृक् ।
सिद्धरूपी शिवस्साक्षात् हालास्येशः क्षितीश्वरान् ।।

पाण्ड्यादादा येक्षु दण्डं प्रादात् ग्रावगजायसः ।
तथैव त्वमपि प्राज्ञ कृतवानसि सांप्रतम् ।।

वर्ण्यते केन महिमा तवाचार्य कृपानिधे ।
इति सत्वा द्विजास्सर्वे तेनानुज्ञापितास्ततः ।।

प्रययुः स्वस्ववेश्मानिः शंसन्तो नामवैभवम् ।
भयात् पापान्मोचितस्सन् प्रणिपत्य गुरुन्तदा ।।

आनन्दबाष्पमुन्मुच्य गिरमूचे कृपानिधिम् ।
स्वामिन् महापातकवान् त्वयाहं तारिते गुरो ।।

युष्मत् कृपाकटाक्षस्य पात्रभूतोस्मि सर्वदा ।
इति स्तुतो गुरुर्विप्रं प्राहस्त्वं सर्वदास्तु हि ।।

शिवं तन्नाम पठनं तत् पूजां च सदा कुरु ।
तत् सेवां कुर्विति प्रोच्य गच्छेत्याह दयानिधिः ।।

ततस्सविप्रः निजमेत्य गेहं
अत्यन्त सन्तुष्टमनाश्च भूत्वा ।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तदुक्तवाक्यं परिपालयन् सन्
कुर्वन् स पूजां न्यवसत् मृडस्य ।।

अखिलशिवमाधिरोगनाश
प्रदमितिहासमनादरेण वापि ।
त्रिपुरदमयितुः प्रियङ्करं यः
पठति श्रृणोति समुच्यते महाघात् ।।

।। इति भविष्यत् पुराणे शिवभक्तमाहात्म्ये एकषष्टितमोऽध्यायः ।।

उपमन्युः —

तस्मिन् कंसारके कश्चित् ब्राह्मणो वेदवित्तमः ।
कुटुम्बीनिर्धनश्चैव दरिद्रात् पीडितो भृशम् ।।

मठे प्रातर्जपपरान् पुराणश्रवणेरतान् ।
ब्राह्मणानिति प्रप्रच्छ केन नश्येद्दरिद्रता ।।

केनवासं पदे मे स्युः तदपायं वदन्तु मे ।
इति पृष्टा द्विजास्सर्वे शास्त्रमालोक्य निश्चितम् ।।

अर्थं ब्रूया द्विजायेति हे विप्रः श्रृणुतो व च ।
सर्वस्वदानं यः कुर्यात् तस्य स्युः सम्पदो ध्रुवम् ।।

अशक्तश्चेत् यथा शक्ति दद्यात् सम्पदवात्फये ।
इत्युक्तस्तैः द्विजैः कश्चित् कस्मै देयं द्विजन्मने ।।

इत्यालोच्य विनिश्चित्य हरदत्ते समर्पितम् ।
शिवभक्ताग्रगण्येऽस्मिन् अक्षय्यं भवति ध्रुवम् ।।

तत् गृहं प्राश्य तन्नीत्वा भोजनार्थेन्यमन्त्रयत् ।
सदाशिवाख्यविप्रेण दरिद्रपनयेच्छुना ।।

प्रार्थितो हरदत्तोऽयं ओमिति प्राह भूसुरम् ।
ततः पञ्चमहायज्ञान् कृत्वा पूजां महेशितुः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गुरुमाह्वय तत् पादौ प्रक्षाल्य शिरसा जलम् ।
धृत्वा दत्वासनं तस्मै साग्रामन्त्रं प्रसार्य च ।।

स व्यञ्जनं च सा पूपं सघृतं सगुलोदनम् ।
सक्षीरं सफलं मृष्टं अन्नम् दत्वा द्विजोत्तमः ।।

अनन्तरं प्रणम्यास्मै स्वाभिप्रायं न्यवेदयत् ।
भगवन् हरदत्तेश पादांबुजविनिन्दक ।।

बहुपुत्रो दरिद्रोऽस्मि सततं दुःखभागहम् ।
एतादृशं कृपादृष्ट्या वीक्ष्य रक्षस्व देशिक ।।
इति संप्रार्थितस्तेन तस्मै प्रोच्याशिवंगुरुः ।।

मन्त्राक्षतान् विभूतिं च दत्वा स्वं वेश्य जन्मवान् ।
तस्मिन् काले नरश्रेष्ट शिवलिङ्गमहीपतिः ।।

द्विजैनमानयामास तं सदाशिवभूसुरम् ।
कस्माद्राज्ञा समाहूतो मयाघः कृतमस्तिवा ।।

इति चिन्ता सताक्रान्तः शनैस्तन्निकटं ययौ ।
अथ दूरात्तमायान्तं वीक्ष्य राजा शिवप्रियः ।।

तं द्वितीयं शिवं मत्वा प्रत्युद्गम्य प्रणम्य च ।
पादौ प्रक्षाल्य तत्तोयं धृत्वा शिरसि सादरम् ।।

आसने तं समारोप्य सौवर्णेर्ध्यं प्रदाय च ।
सौवर्णैः कुसुमैः पादौ तस्य संपूज्य भक्तितः ।।

ददौ दिव्यानि वस्त्राणि शतानि विविधानि च ।
धनानि सारक्षेत्राणि दोग्ध्रीन्द्रे ददौ नृपः ।।

स तत् गृहीत्वा सकलं जगाम स्वगृहं द्विजः ।
तदा तण्डूलभाराणां चतुश्शतमिलापतिः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

बलीवर्दैर्वाहयित्वा प्रेषयामास भक्तिमान् ।
द्विजोऽपि हरदत्तस्य श्रुत्वा पशुपतिश्शिवे ।।

भक्तिमानन्तराहित्यं तस्य मातुः करे ददौ ।
द्रोणधान्यततस्सा च शोषयामास चातपे ।।

वृषभः कश्चिदागत्य तद्धान्यमचरत् द्रुतम् ।
हरदत्तः कराभ्यां तत् समूह्यस्मै ददौ मुदा ।।

तन्माता सहसाभ्येत्य दण्डेनैव मदद्रवत् ।
दूरङ्गते तु वृषभे सुतोमातरमब्रवीत् ।।

क्षुधितं वृषभायातं कस्माद्वारितवत्यसि ।
इत्युक्त्वा शिवपूजायां भक्तं नास्तीत्यवारिषम् ।।

एवमुक्ता सुतं माता तूष्णीं तस्थौ सती तदा ।
एतस्मिन् समये राज्ञा प्रेषिताः पुरुषा गुरुम् ।।

प्रणिपत्येति विज्ञप्ति मूचुस्साञ्जलिपाणयः ।
आचार्यशिवलिङ्गाख्यो नृपप्रेषिततण्डुले ।।

चतुश्शते तु भाराणां द्विशतं तु नदीजले ।
पतितं द्विशतं त्वागात् इति श्रुत्वा सदेशिकः ।।

मातरं प्राह वृषभो सारणेन तु दुष्कृतः ।।

तण्डुलानां विनाशश्च सम्भूतत्वत् कृतेन तु ।
इति तद्वचनं श्रुत्वा मता चिन्तापराभवत् ।।

हरदत्तस्य महिषी कदाचित् तण्डुलं जलैः ।
शोधयन्ती तु तन्मध्ये विनिक्षिप्य महानसम् ।।

शान्तमग्निज्वलयितुं गतातत् समये द्रुतम् ।
आगत्य शुनकः कश्चित् तत् तण्डुलमभक्षयत् ।।

तं दृष्ट्वा कोपतस्तस्मिन् आक्षिपत् सस्य कंतनीम् ।
तत् कृत्तकन्धरेमूर्ध्नं शुनिप्राप्ते च सा भयात् ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मत्वा ज्ञानात् कृतमिति पञ्चाक्षरमुवाच ह ।
तदा माध्याह्निकं कृत्वा हरदत्तस्समागमत् ।।

दृष्ट्वा किमेतदित्युक्त्वा बभूव विमनाक्षणम् ।
त्वय्येव दोषो नूनं यत् द्वारं न विहितं त्वया ।।

इति विनिन्द्यामुं ज्ञात्वा च विगतागसम् ।
स्वांके तमादाय गले परध्वांरुद्राक्षमालिकाम् ।।

भस्मनोद्धूल्य सर्वाङ्गं पञ्चाक्षरमुपादिशत् ।
तस्मिन् काले विमानाग्र्यं सूर्यकोटिसमप्रभम् ।।

आगतं शुनको दृष्ट्वा पूर्वदेहं विसृज्य च ।
दिव्यं रूपं समादाय कैलासमगमन्मुदा ।।

पुनरावृत्तिरहितं गाणापत्यं ददौ शिवः ।
गते शुनि च कैलासं हरदत्तो मुदं ययौ ।।

न्यवारयद्विषन्माता व्रीहिभक्षण तत् परम् ।
भार्या च सस्यकं निन्यावानंकोवातुरावधीत् ।।

चिन्तयोन्निष्कृतिरिति कदाचिद्रहसि स्थिता ।
हरदत्तोऽथमतिमान् मनसैवमचिन्तयत् ।।

ज्ञानाज्ञान प्रयुक्तानां पापानां महतामपि ।
इति श्लोकार्थमालिख्य पत्रे संस्थाप्य तद्गृहे ।।

पापौघध्वंसिनी नृणां ततः पुण्यां मरुद्वृधाम् ।
ऋषिभिस्सेवितां स्नातुं जगामहरदत्तकः ।।

धृत्वा तद्रूपमीशानः प्राप्यमृत्युनिकेतनम् ।
एकान्तनिष्कृतिः शम्भोः सकृदेवाभिकीर्तनम् ।।

इत्युरार्चमालिख्य पत्रे तज्जाययार्पिते ।
पुनस्तस्य करे पत्रं दत्वा तूर्यं विनिर्ययौ ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

याते शिवे गुरुस्नात्वा समागत्य स्वमन्दिरम् ।
शम्भोस्सपर्यां निवृत्य पञ्चयज्ञास्समाप्य च ।।

अतिथीन् भोजयित्वा च ततः पुत्रादिभिस्सह ।
भुक्त्वासने स्थितः पश्चात् गृहीत्वा पत्रिकां गुरु ।।

दृष्ट्वा परार्द्धं लिखितं जायां वीक्ष्येतदब्रवीत् ।
कस्य हस्ते प्रदत्तासि पत्रिकामिति सा प्रियम् ।।
पते त्वं पुनरागत्य विलिख्यगतवानसि ।
इत्युक्तो भार्ययाचार्यः शिवनाम्नः प्रभाववीत् ।।

मया यत् चिन्तितं चित्ते तदेवालिख्य शङ्करः ।
गतवानतिसन्तोषा दानन्ताश्रूण्यमुञ्चत ।।

ततोऽनिशं पूजितेऽशो नदीकूले द्विजैस्सह ।
पुराणश्रवणं कुर्वन् देशिकस्थितवान् मठे ।।

कदाचित् वैश्वदेवान्ते कृतद्वारावलोकने ।
आयान्तमतिथिं दृष्ट्वा शिवभक्तं मुदान्वितः ।।

आहूय तस्मै दत्तवान् षड्रसोपेतमादरात् ।
हरदत्तः स्वयं भुक्त विशश्राम द्विजेन सः ।।

अन्नदानेन तुष्टस्सन् कृतताम्बूलचर्वणः ।
स्वामि क्षेत्राणि ते सन्ति नवेत्येनं सपृष्टवान् ।।

अस्त्येव नक्षत्र मकृष्टपच्य
मनर्घभागद्धितमोपपन्नम् ।
उपधौषधीशां कुरमुन्नदीकं
उद्यत् सदाभोगमुपाधिशून्यम् ।।

एवमाचार्यकथनात् विस्मितो विविधाः कथाः ।
शैवीः श्रुत्वा कृतार्थोऽस्मीत्यनुज्ञाप्य द्विजो ययौ ।।

।। इति शिवभक्तमाहात्म्ये पूर्वभागे हरदत्ताचार्यचरिते द्विषष्टितमोऽध्यायः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उपमन्युः –

कदाचित् सह्यजातीरं हरदत्ते महात्मनि ।
प्रजाते ब्रह्मयज्ञार्थं शिवध्यानपरायणे ।।

प्रवेष्टुः सह्यजां काचिन्नीचनारी समुद्यत ।
तन्निरीक्ष्य पति प्राह मुग्धेन प्रविशेत्यथ ।।

सा पतिं प्राह कावेर्यां स्नातानां पातकान्यपि ।
महान्ति नाशमायाति दर्शनं चापि पापहम् ।।

भवानृणद्धि किं मामित्युक्तः प्राह पतिप्रियाम् ।
अस्यां स्थितायां सिकता सर्वालिङ्गान्यसंशयः ।।

तस्मात् प्रवेष्टुं नो युक्तं इति तेनरितं वचः ।
श्रुत्वाचार्यस तत् समक्षंमागत्यैनां प्रणम्य च ।।

तत् पादरक्षां शिरसा धृत्वा नाट्यं चकार सः ।
सन्तोषातिशयादेतत् श्लोकं गायन् पुनः पुनः ।।

कर्मावलम्बिनः केचित् केचित् ज्ञानावलम्बिनः ।
वयं तु वेद भक्तानां पादरक्षावलम्बिनः ।।

समस्तप्राणिनश्शर्वरूपान् भावयतस्सदा ।
आचार्यस्य गृहे भक्तं शुनकोऽन्नमभक्षयत् ।।

आचार्यस्तं विचार्यैशं शेषं निर्माल्यमित्यसौ ।
भुक्त्वा सशिवं ध्यात्वा सर्वत्र समदर्शनः ।।

ततः कदाचिदाचार्यः कृताभ्यङ्गः कवेरजाम् ।
स्नातुं ययौ काञ्चिकञ्च स्नानीयं गृह्यपाणिना ।।

तदा तस्मिन् पथि शिवो नीचरूपधरस्तृषा ।
क्षुधा च पीडितो वृद्धः कम्पमानकलेबरः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

क्लान्तोनितान्तमेतस्य समीपं प्राप्य गद्गताम् ।
वाचं प्रोवाच हे नाथ बलहीनो जरार्दितः ।
व्याधिभिः पीडितोऽत्यन्ततप्तोऽहं जाठराग्निना ।।

तच्छान्तिं कुरु मे ब्रह्मन् इति तेनीरिते गुरुः ।
अङ्गीकृत्वा तमीशानं भावयन्नरनालकम् ।।

न्यषिंचदास्यै तस्याथ पीत्वा सोऽपि भ्रमंजहौ ।
चोरोजाभितः कश्चित् धर्मश्चाशिववल्लभः ।।

विषु वायनमुख्येषु पुण्यकालेषु सर्वदा ।
करिष्यति महापूजां शम्भोरमिततेजसः ।।

यदा यदाहि कुरुते पूजां शम्भोस्तदा तदा ।
तस्य स्वप्नेशिवस्तृप्तिर्जातेति च वदिष्यति ।।

तस्मिन् दिने दैववशात् अग्नीशस्य विशेषतः ।
पूजामकारयत् भक्त्या राजा तु बहुविस्तरम् ।।

पञ्चामृतैः पञ्चगव्यैः आम्रैः पनसदाडिमैः ।
नालिकेरैरिक्षुरसैः शर्करामधुचन्दनैः ।।

लिकुचाद्यैश्शुद्धतोयैः अवाङ्गमनसगोचरैः ।
कृत्वाऽऽभिषेकं बहुभिः वस्त्रैः पीतांबरादिभिः ।।

अलंचकार सौवर्णैः बिल्वपत्रैश्च भूषणैः ।
मल्लिकाचम्पकाम्भोजकल्हारप्रमुखैः सुमैः ।।

कर्पूरगन्धधूपाद्यैरुपचारं चकार सः ।
मुद्गान्नैश्शर्करान्नैश्च माषान्नैस्सर्षपोदनैः ।।

दध्यान्नैः पायसान्नैश्च शुद्धान्नैर्व्यञ्जनैः शुभैः ।
पयोदधिघृतैरन्यै रम्भापनसचूतकैः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अपूपाद्यैर्मोदकाद्यैरवाङ्मनसगोचरैः ।
रसाद्यैर्नालिकेराद्यैर्नैवेद्यमकरोत् प्रभोः ।।

नीराजनैस्सताम्बूलैच्छत्रचामरदर्पणैः ।
प्रदक्षिणनमस्कारैर्मन्त्रपुष्पादिभिः शिवम् ।।

पूजयित्वा विशेषेण तर्पयामास भूसूरान् ।
रात्रौ पुनः शिवं नत्वा भुक्त्वा सुप्तिमुपागमत् ।।

बुध्वा सुरपतिः कश्चिद् कपिं दृष्टेति दुःखितः ।
पुनः सुष्वाप भूपाल स्वप्ने आगत्य धूर्जटिः ।।

अस्मिन् दिने तथा पूजा त्वया चोलमहीपते ।
यथापूर्वं कथा पूजा न प्रीत्या मम किन्तु मे ।।

धृत चण्डालरूपाय हरदत्तो मुनीश्वरः ।
पिण्याकपात्रनिक्षिप्तमारनालं ददौ दिवा ।।

तेनैव तृप्तिस्सञ्जातेत्युक्त्वाग्नीशस्तिरोदधे ।
पुनर्बुध्वा महीपालो हरदत्तं शशंस सः ।।
प्रातरावश्यकं कर्म कृत्वा चोलमहीपतिः ।।

परिपूर्णं मठं गत्वा ब्राह्मणैः पावकोज्वलैः ।
हरदत्तं प्राणम्योच्चैः स्वप्नवृत्तं व्यजिज्ञपत् ।।

श्रुत्वा सर्वेश्वरं वृत्तं हरदत्तमपूजयत् ।
तच्छ्रुत्वा हरदत्तोऽपि रोमाञ्चिततनूरुहः ।।

शिवप्रसादलाभेन परमानन्दमाप्तवान् ।
सः कदाचिन्महीपालः चोलभूपरिपालकः ।।

साधूनामवने दक्षे दुष्टानां शासने तथा ।
राजनीत्या जगत्सर्वं धर्मेण परिपालयन् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तीर्थयात्रापरो भक्त्या सर्वक्षेत्रेषु सञ्चरन् ।
क्रमात् कंसपुरं प्राप यत्राग्निश्शापमोचितः ।।

तत्र कावेरिकातोयगङ्गादीनां च शोधके ।
नर्मदे मोक्षदे स्नात्वा नत्वा कल्पकनायिका ।।

दृष्ट्वाग्नीं तथान्यांश्च प्रदक्षिणकृतालये ।
भस्मोद्धूलित सर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ।।

रुद्राक्षमालाभरणं नासाग्रं न्यस्तलोचनम् ।
ऋजुकायशिरोग्रीवं ज्वलन्तं ब्रह्मतेजसा ।।

पद्मासने समासीनं ध्यायन्तं परमेश्वरम् ।
ददर्श हरदत्ताख्यं आचार्यं लोकविश्रुतम् ।।

प्रणम्य दण्डवत् भूमौ रक्षरक्षेति चाब्रवीत् ।
कुशलं परिपृच्छन्तं राष्ट्रकोशे बलादिके ।।

आचार्य त्वत्कृपादृष्ट्या सर्वत्र कुशलं मम ।
इत्युक्त्वा चोलभूपालो भूयो नत्वा तमब्रवीत् ।।

स शरीरं तु कैलासं यातुमिच्छाम्यहं प्रभो ।
तदुपायं वद त्वम्मे सर्वज्ञोऽसि दयानिधे ।।

इति पृष्टवति प्राह सप्तस्थानेशसेवनम् ।
यामार्द्ध एव कुरु तं मनोरथमवाप्स्यसि ।।

पतातिपरिचारेण धृतच्छत्रोऽश्ववाहनः ।
आचार्योक्तं तथा कृत्वा वेगेन पुनरागतः ।।

अग्नीशमन्दिरगारे संस्थाप्यच्छत्रिणं हयम् ।
दृष्टमग्नीश्वरं भूयो राजा गच्छत्तदा भयः ।।

विह्मलोवेगगमनात् फेनं बहु ववाम च ।
छर्दीवमूर्च्छिता भूमौ पपात भृशविह्वलः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तौ विमानसमारोप्य ययौ कैलासमीश्वरः ।
निर्गम्यदेव भवनात् आचार्येण प्रदर्श तौ ।।

सशरीरं विमानस्थौ दृष्ट्वात्मानं निनिन्दि सः ।
कथं तोयो विमानाप्तिः कुतो मे तदभावतः ।।

राज्ञेति पृष्ट आचार्यः तत् प्राप्तौ गमनं वृथा ।
तदा प्राप्तौ हयेनैव गमयन् च्छत्रिणा तथा ।।

हेतुस्तथाहि लोकेस्मिन् कर्षकोऽपि भृतिं भजेत् ।
सप्तस्थानमतो भूयो गत्वा पादेन भक्तितः ।।

यामार्ध एव वेगेन पुनरागच्छ भूमिवा ।
सशरीरेण गन्तासि कैलासं नात्र संशयः ।।

इत्युक्तः सकलं कृत्वा तदुक्तं पुनरेव सः ।
प्रणम्याग्नीश्वरं भूयो मन्दिरान्निर्गतोबाहि ।।

तत्राचार्यं पुनर्दृष्ट्वा प्रणम्य मुनिपुङ्गवम् ।
युष्मदुक्तं कृतं सर्वं मयेत्याह नृपोत्तमः ।।

तस्मिन्काले परे दृष्टमप्सरो गणसेवितम् ।
सूर्यकोटिप्रतीकाशं नानारत्नविभूषितम् ।।

भेरिवादित्र सङ्घोषं काहलध्वनिसंयुतम् ।
तत्र दृष्ट्वा महादेव आरूढवृषपुङ्गवम् ।।

अम्बां कुमारहेरम्बनन्दीमुखनिषेवितम् ।
ब्रह्मविष्णवादिविजयध्वनिपूरितदिङ्मुखम् ।।

पुरो नन्दीशपठितं नानावैभवसन्ततिम् ।
तुष्टुवुर्हरदत्ताद्या चोलराजेन संयुतः ।।

सामान्यहरदत्तादीन् विमाने चोलभूपतिम् ।
आरोपयामास शिवो महादेवो दयानिधिः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चोलराजो नमस्कृत्य हरदत्तं मुनीश्वरम् ।
शिवेन सह कैलासं प्राप सर्वैविशेषितम् ।
चोलराजस्य चरितं कथितं वो मया द्विजाः ।।

ततः कदाचित् गिरिशो द्विजो भूत्वा जुहाव तम् ।
हे शास्त्रिणं इति प्रोच्चैः स्वरेणतमथाह सः ।।

न वयं कवयो न शस्त्रिणो वा
न च पौराणिक नाटकप्रवीणाः ।
शिवनामनि देवताविशेषे
परमानन्दपयोनिधौ निमग्नाः ।।

कश्चित् द्विजोवारवधूं हरदत्तसुतोस्म्यहम् ।
दास्यामि ते द्रव्यमिति प्रोक्त्वारेमे तया सह ।।

स्वग्रामं प्रययौ धूर्तः चिरकालादनन्तरम् ।
सावेश्याचार्यमेत्याह तव पुत्राश्चिरं मया ।।

क्रीडित्वा दत्तप्रश्नस्सन् प्रययौ स्वं निकेतनम् ।
तस्यास्तदाकर्ण्य वचः शिवभक्तशिरोमणिः ।।

तस्यां च शम्भुर्वसतीत्यस्मै निष्कसहस्रकम् ।
ददौ सा चाग्रहीत् द्रव्यं अधीरो लोभमोहितः ।।

अथाष्टपुत्राः कितवः तेष्वेकोऽपि न विद्यते ।
गृहीतं वित्तमाचार्यात् पुनर्देहीति ते जनान् ।।

प्राह सा च भृशं भीता हरदत्तायमादरम् ।
प्रणिपत्य गृहीष्वैतं द्रव्यमित्याह सोपि ताम् ।।

प्राभद्रेमयादत्तमीश्वरार्पणबुद्धिना ।
पुनर्गृहीतुन्नो युक्तं इत्युक्त्वादाय तद्धनम् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तेन मध्यार्जुनेशस्यवसुना प्रस्तरादिभिः ।
कारयामास सोपानमार्गं सा भक्ति संयुता ।।

।। इति श्रीशिवभक्तमाहात्म्ये हरदत्तचार्यचरिते त्रिषष्टितमोऽध्यायः ।।

उपमन्युः —

कदाचित् सुमहानासीत् उत्सवः पावकेशितुः ।
रथमारुह्यवह्नीशो जनानां क्षेमवृद्धये ।।

भेरीदुन्दुभिवाद्यैश्च मृदङ्गपटहादिभिः ।
अरजैः काहलीमुख्यैः गायकैर्नर्तकैजनैः ।।

ध्वजैश्छत्रैः पताकादि दीपिकाभिर्विनोदकैः ।
असंख्यैर्व्यञ्जनैः पूर्णां चन्दनागारुधूपिताम् ।।

गन्धतोयैश्च संसिक्तां नानातोरणमण्डिताम् ।
अम्बे कुमार हेरम्ब चण्डेशाद्यैश्च देवतैः ।।

संवृतामाश्रमैः पुण्यैश्शोभितां प्राप वीथिकाम् ।
सर्वाङ्गरणसंपन्नाः सर्वाः कंसपुरास्त्रियः ।।

दृष्टं विनिर्गता शंम्भुं तां दृष्ट्वा शोकमोहिते ।
हरदत्ताचार्यसुते वस्त्रभूषणवर्जिते ।।

पितरं प्राप्य तं तत्वं भूषणानि दिशावयोः ।
इत्याहतुश्च शोकार्ते हरदत्तोऽब्रवीत् सुते ।।

सर्वाङ्गनात् भवेत् भूतिर्भूषणं खलु शोभनम् ।
शिवापदानश्रवणकर्णयोर्मण्डनं सदा ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

करभूषाशिवाश्चैव प्रदक्षिणविधिर्भवेत् ।
पादयोर्भूषणं तस्मात् किमर्थं दुःखिते सुते ।।

इत्युक्ते ऊचतुर्भूयो युष्मदुक्तं तु बालिका ।
अस्यैव भूषणं तात तथाप्यावां तु बालिका ।।

हसन्ति परमास्तस्मात् लौकिकीं भूषणं दिश ।
इत्युक्तो हरदत्तोऽपि स्वसुते प्राह विह्वलः ।।

पूर्वजन्मोपासकानां कलु भूषादिकं भवेत् ।
न शिवः पूजितोऽस्माभिः कथं नो भूषणं भवेत् ।।

इति तद्वचनं श्रुत्वा बालके ऊचतुः पुनः ।
युष्माकं किल मह्यं स्यात् अवश्यं दीमतामपि ।।

तथोक्तोहरदत्तोऽपि तूष्णीं ध्यानपरो भवेत् ।
तस्मिन्नवसरे कश्चिदायातो वृषपुङ्गवः ।।

तदीयखुरविन्यासे यथेष्टं भूषणं भवेत् ।
गृह्यतामिति तत् प्रोक्ते गत्वा तस्य पदे पदे ।।

भूषणानि विचित्राणि दृष्ट्वा संगृह्यते सुते ।
पितुरन्तिकमायाते तत् पृष्टे ऊचतुर्मुदा ।।

पादांगुलीयकं पादकटकं पारिहर्यकम् ।
क्षुद्रकिङ्किणिकाजाले मेखलाकटि सूत्रकम् ।।

कुन्दफलोनिष्कभोदो हारोविक्रममालिका ।
अङ्गदं कङ्कणं चैव प्रवालवलयादिकम् ।।

अङ्गुलीयकभेदं च वालिकास्वस्तिकादयः ।
ताटाङ्कपट्टबध्नौ च तिलकाकारभूषणम् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शिरोभूषादिकं चान्यत् द्रष्टुमित्यथसोब्रवीत् ।
यथा प्रदेशन्माता नावलङ्कारं करेत्विति ।।

मातुर्न्निवेद्य तत् सर्वं अलङ्कारयवामिति ।
ऊचतुस्सा सुतो सर्वैः अलङ्कृत्य यथाविधिः ।।

वज्रांशुधवलाहार वनयौपतकाधिकम् ।
अलङ्कुरुतमग्नीशं श्रीमत् कल्पकनायिकाम् ।।

इति दत्वा च ताम्बूलं सखीभिस्स गते सुते ।
अनुज्ञाप्य महादेवं सवितुं सातिविस्मिता ।।

पावकेशदयां चैव भर्तुश्च महिमां तथा ।
संस्मृत्य संस्मृत्य पुनः सन्तोषमपरं ययौ ।।

तत् सुताभरणं लोका श्रुत्वा तत् प्राप्तिकारणम् ।
वीथ्यां जनाश्शसंसुस्तं हरदत्तमुनीश्वरम् ।।

कदाचित् गोवट्टुपतिं नत्वा प्रत्यागते गुरौ ।
मध्येमार्गं गर्जितेन सहवृष्टिरभूत्तरः ।।

ततोवृतादिशस्सर्वाः ततः शम्भुः कृपावशात् ।
वेषधारि पालकस्य सधनुः पृष्टतोन्वगात् ।।

दृष्ट्वाऽसौ तं गुरुं प्राह कस्त्वमित्यथ सोऽब्रवीत् ।
गोवट्टुस्थानपालोऽहं त्वत् सहायार्थमागतः ।।

इति तस्य गिरं श्रुत्वा मधुरां सह ते न सह ।
गृहमागत्य तत्रैनं भोजनार्थे न्यमन्त्रयत् ।।

भोक्ष्यामितीव तत् श्रुत्वा तस्य हस्तेसचोदनम् ।
सकारवल्ली फलकं दत्वा गच्छेत्यवोच ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तस्मादन्नं गृहीत्वेश स्वाल्यं प्राप्य तत्र सः ।
विकीर्यलिङ्गप्रवरे प्राविवेश महेश्वरः ।।

प्रातरागत्य पूजार्थं पूजकन्याविलोकितम् ।
विकीर्णमन्नकिमिदमिति तस्थुः सविस्मयः ।।

अधिकारी समाकर्ण्य तत्स्थलस्य सविस्मयः ।
कशाभिस्ताड्यमास तत्रत्यामनुजानुतः ।।

ते तमूचुर्वयं रात्रौ कवाटानि पिधाय तु ।
निर्गता स्वस्वसदने सुप्ताः प्राप्तरिहागताः ।।

काचिदस्मासु कोऽप्यत्र न स्थितो निशि चालये ।
तस्मात् जानीमहे किञ्चिन्नवयं शिवसद्मनि ।।

कृत्यजातमिति प्रोच्यस्थितास्तूष्णीमधोमुखाः ।
ततो वागंतरिक्षे तु सम्बभूवाशरीरिणी ।।

पूर्वेद्युर्हरदत्तोऽयं शिवसेवार्थमागतः ।
सेवां सायन्तनीं कृत्वा प्रतियातुं प्रचक्रमे ।।

मध्ये वृष्टिस्समभवत् स्तनिताशनिभीषणः ।
ततः शिवसहायार्थं यावत् तद्गेहमन्वगात् ।।

तत्रासौ परमप्रीतो भोक्तव्यमिति तं निशि ।
प्रार्थयित्वान्नमदात् कारवल्लीफलान्वितम् ।।

स च बालकरूपोऽयं बालचन्द्रशिखामपिः ।
तदादायालयमगात् विकीर्णं तेन तत्र तत् ।।

इति वाचं समाकर्ण्याकाशगां विस्मिता जनाः ।
दृष्ट्वा कृपां महेशस्य तस्मिन् तं तुष्टुवुर्भृशम् ।।

TCC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आयाति वृद्धो वयसा निजेस्मि-
न्ग्रामेशसप्तस्थलवासि शम्भून् ।
आवाह्य लिङ्गेषु दिने दिने ता-
न्ददर्श भक्त्यैकमनास्सुमुक्तैः ।।

अस्ति कश्चिन्महाप्राज्ञः त्र्यम्बक इति श्रुतः ।
अधीत्य सकलाविद्याः कस्माश्चिद्यतिसत्तमात् ।।

शुश्रूषया च परया भक्त्या च विनयेन च ।
सन्तोष्य गुरुमेकान्ते पप्रच्छ त्र्यम्बकाह्वयः ।।

अभ्यस्ताः सकलाविद्याः पञ्चाक्षरपुरोगमाः ।
ज्ञातव्यांशोऽस्ति तद्ब्रह्मन् तमाचक्ष्व यतीश्वर !।।

इति पृष्टो महाप्राज्ञो मनस्येवमचिन्तयत् ।
लोके पञ्चाक्षरसमो नास्ति मन्त्रः श्रुतौ स्मृतौ ।।

तथापि वयं पृच्छामः मूढ एव न संशयः ।
अस्ति किञ्चित् रहस्यं तत्पश्चात् वक्ष्यामितो नघः ।।

इति गुर्वीरितं श्रुत्वा तस्थौ तद्ग्रहणेच्छया ।
चिरकाले गते चैवं कस्मिंश्चिद्दिवसे यतिः ।।

आहारार्थं गते शिष्ये तदनुग्रहणेच्छया ।
न वेदितव्यं किमपि नास्ति पञ्चाक्षरं विना ।।

इति भूमौ विलिख्याथ यतिः प्राप पराङ्गतिम् ।
कश्चिन्नदी भूमौ लीनाक्षरमालिकाम् ।।

स्वकर्णपत्रे संविलिख्य तृप्तां स्वगृहं ययौ ।
तद्वतां विदित्वायं खिन्नस्तन्निकटङ्गतः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नाना विधोपचारेस्तं तत्ताटङ्कमायताम् ।
सा तेन विषयान् भोक्तुं इच्छन्ती तमुवाच ह ।।

त्वं मया सह भुक्तिं च शयनं च करोषि चेत् ।
तदा ताटङ्कपत्रान्ते दास्यामि नहि संशयः ।।

इति तस्य वचः श्रुत्वा तदुक्तान्यखिलानि सः ।
कृत्यानि कृत्वा ताटंङ्कं दत्तं चेत् प्राप तुष्टये ।।

विलोक्य गुरुणा तस्मिन् लिखितान्यक्षराणि सः ।
भूत्वा सन्तुष्टचित्तः स्यात् सङ्गपापनिवृत्तये ।।

मध्यार्जुने पुष्पयोगे सह्यजोऽन्यां कृताप्लवः ।
महालिङ्गमसौ दृष्ट्वा हरदत्तगृहं ययौ ।।

तत्र तं वीक्ष्य हे नाथ क्षुधितायान्नमर्पया ।
मह्यं पावनमित्युक्तस्समाहूय कृपानिधिः ।।

तस्मै भक्तमसौ प्रादादेकपङ्कतौ च भुक्तवान् ।
तद्वृत्तान्तं जनः श्रुत्वा तं समेत्याब्रवीदिदम् ।।

महापातकिनानेन भुक्तवानसि देशिकः ।
समपङ्कतौ समं तस्मात् इदं लोकविगर्हितम् ।।

इत्युक्तं च द्विजं वाक्यं श्रुत्वा प्राह सुदर्शनः ।
तिष्यामासे तु पुष्यर्क्षे सह्यजायां कृताप्लवः ।।

महालिङ्गं च संसेव्य महापापाद्विमुक्तवान् ।
इति तद्वाक्यमाकर्ण्य जनः पुनरभाषत ।।

गणिकाया सङ्गमं च तया सम्भवभोजनम् ।
विप्रंत्र्यंबक नामानं समीपस्तमभाषात।।

हे त्रिं धापक गत्वा त्वं ऐभिस्सार्द्धवोलयम् ।
पुष्यर्क्षे मज्जनादेव तपसन्दर्शनान्मम ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पापं गतं नवेत्येवं पृच्छ मध्यार्जुनेश्वरम् ।
इत्युक्त त्र्यम्बकस्तेन प्रययौ तैर्द्विजैस्सह ।।

स्थानं मध्यार्जुनेशस्य शिवभक्तजनाकुलम् ।
तत्र प्रणम्य भूतेशं इदमाह द्विजोत्तमः ।।

देव देव दयाशीलो पुष्यर्क्षे सह्यजाजले ।
स्नानांतदर्शनाद्वेश्यासङ्गसम्भूतपातकम् ।।

तथा स जग्मिजं पापं क्षीणं वादय मे शिव ।
अथाकर्ण्य वचस्तस्य भक्तरक्षणदीक्षित ।।

शिवस्तं प्राहहेवत्सक्षीणमंहस्त्वया कृतम् ।
ते तद्वाक्यं समाकर्ण्यशरणागत रक्षितु ।।

शिवस्य त्र्यम्बकं प्रोच्य श्रूयतेव प्रतिध्वनिः ।
इति तै कथितस्सोऽपि गत्वा गुरुसमीपतः ।।

तस्मै बभाषे तद्वाक्यं तच्छ्रुत्वासोपि निर्गतः ।
तेन साकं स्थलं प्राप्य जनानां सन्निधौ द्विजम् ।।

पूर्ववत्पृच्छ देवेशमित्युवाच सदेशिकः ।
सतच्छ्रुत्वा शिवं नत्वा पूर्ववत् पृच्छति स्मितम् ।।

घृणानिधिर्महेशोऽपि तेषां मनसि संशयान् ।
स्थितानपानुदन् प्राह स्वरेण महता हरः ।।

गतं गतमिति प्रोच्चैस्तवपापं द्विजोत्तम ।
ते च मध्यार्जुनेशस्य वाचः श्रुत्वा जनास्तदा ।।
हरदत्तं प्रशंसन्तः साश्चर्या प्रययुर्गृहान् ।।

।। इति शिवभक्तमाहात्म्ये हरदत्ताचार्यचरिते चतुष्षष्टितमोऽध्यायः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उपमन्युः —

ततः कालान्तरे कश्चित् हरदत्त स्वसुस्सुतः ।
नत्वा मातुलमेकान्ते पङ्कुपप्रच्छ सादरम् ।।

मणिकर्ण्यामहं स्नातुं इच्छामि त्वदनुग्रहात् ।
कृपां मयि कुरुष्वेति प्रार्थितस्तं जगाद सा ।।

अस्मिन् सरोवरे स्नाहीत्युक्तस्सोऽपि विशुद्धधीः ।
न्यममज्ज ततः काश्यां मणिकर्ण्यां समुत्थितः ।।

कुर्वन् गङ्गाजले स्नानं वन्दनं च महेशितुः ।
निनाय वासरान् कांश्चित् विश्वनाथस्य सन्निधौ ।।

तत्र कश्चित् क्षिपन्नक्षान् जायया स हि तं द्विजम् ।
प्रोवाच को वा त्वद्ग्रामे द्विजवर्य महामते ।।

हरदत्त इति ख्यातः कुत्रास्ते द्विज सत्तमः ।
निरूढो वैदिके मार्गे काश्यपान्वयभूषणः ।।

वदेति पृष्टस्तं प्राह भागिनेयो गुरोस्तदा ।
मम कंसाकरो ग्रामः त्वत्पृष्टो मम मातुलः ।।

हरदत्तोऽपि शैवेन्द्र सुखं तत्रैव तिष्ठति ।
इति तद्वाक्यमाकर्ण्य सन्तुष्टस्स द्विजोत्तमः ।।

प्रोवाच काश्यां त्वां कश्चित् कुशलं पृष्टवानसि ।
ब्रूहीत्यथ द्विजं वीक्ष्य लज्जयाथ स्मितानना ।।

तुभ्यं कुशलमप्राक्षीत् पतिं ब्रूहीत्यभाषत ।
तयोर्वचनमाकर्ण्य हरदत्तस्वसुः सुतः ।।

एवं ब्रुवाणो विप्रेन्द्र पृष्टवां स्तावुभावहम् ।
केनोपायेन गच्छेयं पङ्कुरित्यवनीसुरः ।।

ऊचतुस्तै समाकर्ण्य तद्विजं केन वर्तमना ।
त्वमागा इति तत् श्रुत्वा पुनस्तौ प्राहभूसुरः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मत्ग्रामे ब्रह्मतीर्थे मां स्नाहीति मम मातुलः ।
उवाच तत्र स्नात्वाहं मणिकर्ण्यां समुत्थितः ।।

पुनस्स्वग्राममगमने ह्यशक्तोऽस्मीति वादिनम् ।
नायकस्तद्वचः श्रुत्वा गत्वा त्वं मणिकर्णिकाम् ।।

स्नाहीत्युक्तस्तथा सोऽपि स्नातः स्वग्रामसंस्थिते ।
उदमज्जत् ब्रह्मतीर्थे तत्क्षणादेव हर्षयन् ।।

ततः स्वमातुलोऽपान्तमेत्य प्राह प्रणम्य सः ।
युष्मत्कृपाबलात् स्नात्वा गङ्गायामागतोऽस्म्यहम् ।।

मातुलस्नेहतः प्राह यः कश्चित्तत्र पूरुषः ।
ज्ञातवानस्मि मां ब्रूहि किमित्युक्तस्सचाब्रवीत् ।।

तत्र काश्यां स्थितौ कश्चित् दम्पती नटरूपिणम् ।
त्वां पृष्टवन्तौ कुशलं द्यूतकेलीविनोदिनौ ।।

इति तद्वाक्यमाकर्ण्य सादरं प्रभवेशिकः ।
पृष्टवन्तौ पृष्टवन्तौ इति हर्षान्ननर्त सः ।।

हस्ततालान्यसौ कुर्वन् सानन्दाश्चुण्यमुञ्चत ।
उदमज्जत्तदारभ्य नामान्तरमिहास्य च ।।

मणिकर्णिकातीर्थमिति लोके ख्यातिं गमिष्यति ।
मद्वत्तराणां पापानां नाशने विश्रुता भुवि ।।

हरदत्तादिकास्सर्वे श्रुत्वा तां गिरमद्भुताम् ।
एतां च शिवलीलामित्यूचुर्भक्ते प्राकशितम् ।।

ततः सर्वज्ञ तां प्राप्य मातुलां हरदत्तकात् ।
मालाया श्रुतिसूक्तीनां व्याख्यान मकरोद्धि सः ।।

दृष्ट्वास्मिन्तादृशीं भक्तिं जनास्तुष्टास्सविस्मया ।
हरदत्ताह्वयं चक्रुस्तमपि श्रुतिपारगः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ततः कालान्तरे कश्चित् चोरयित्वा नृपालये ।
पलायमानमन्वेष्टुं पुरमाला समाययुः ।।

चोरस्तु तेभ्यो भीतस्सन् आचार्यशरणङ्गतः ।
तं वीक्ष्य हरदत्तोऽपि भयविह्वलमानसम् ।।

उवाच कस्त्वं भवति कुत कस्मादिहागतः ।
इति पृष्टस्तदाप्राह चोरस्तु हरदत्तकम् ।।

अहं राजगृहेचौर्यं कृतवानस्मि भो द्विज ।
तेन ते हन्तुमायान्ति तेभ्यो रक्ष ! कृपानिधे ! ।।

स तद्वचो निशम्यैनं उपवीतविभूषितम् ।
रुद्राक्षभूषितं कृत्वा कांस्यपात्रे स्वके गुरुः ।।

भोजयामास तं भक्तं ततः प्राप गृहं भटाः ।
अत्रागतः कुत्रगतः चोर इत्येनमब्रवीत् ।।

ततस्तद्वचनं श्रुत्वा प्रत्युवाच भटान् गुरुः ।
मदीयोऽयं सुतोभुङ्क्ते नान्यकश्चिदिहागतः ।।

यूयंमन्तर्गृहं प्राप्य सम्यक् शिक्षितुमर्हथ ।
विचिन्त्य तनु गृहं तेऽपि तमदृष्ट्वा विनिर्गताः ।।

यथा यातं ययुस्सर्वे हरदत्तोऽपि सर्वतः ।
शिवैकभावनांकुर्वन् हृदि ध्यायन् शिवंस्थितः ।।

महादेवोपि तं दृष्ट्वा हरदत्तस्य भावनम् ।
आरूढवृषभोदेव्या सह ब्रह्मादिभिः सुरैः ।।

नन्दिभृङ्गि महाकाल मुखप्रमथनायकैः ।
स्तुतोऽपि जयघोषेण कुर्यात् घोषेण सर्वतः ।।

देदीप्यमानस्तेजोभिः विद्योदित दिगन्तरैः ।
जटागङ्गातरङ्गान्तलसादिन्दुकलाधरः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

खेलद्भिर्भुजगद्वन्द्वैरारूढमकुटो ततः ।
गौरिमणिमयैर्दर्शं कपोलतललंबिना ।।

मण्डिता कुण्डलीशान कुण्डलेन फणाभृता ।
दन्तमुक्तानि बिम्बोष्ट प्रवालमणिपेटकः ।।

स्मितश्रीपुञ्जकिञ्जल्कमञ्जुलाननपङ्कज ।
मृगट्गवराभीतिशस्तहस्त्रचतुष्टयम् ।।

वृषधाटीचरद्धरुद्राक्षी स्वभुजान्तरः ।
ककुदास्फालनोदञ्चत् फणिकङ्कणशिञ्चितः ।।

समारूढाद्रिजटाजूटो दचतुरोमाञ्चकञ्चुकः ।
उत्तरीयायितो दण्डवेतसाजिनमण्डितः ।।

कटिसूत्रकृतव्यालनद्धव्याघ्राजिनाम्बरः ।
आखण्डलादि कोटीरकोटीमणिमरीचिभिः ।।

आम्रेडितप्रभापूरस्फारमाणिक्यपादुकः ।
घृतकाठिन्यवन्मूर्तिः सच्चिदानन्दविग्रहः ।।

स्व सायुज्यपदं दातुं आविरासीत् कृपानिधिः ।
ततस्तं हरदत्तोऽपि प्रादुर्भूतं सदाशिवम् ।।

मोक्षदं वीक्ष्य वीक्ष्याग्रे प्रणनाम ननर्त च ।
आकारं वीक्ष्य वीक्ष्याग्रे प्रणनाम पुनः पुनः ।।

ततस्तुष्टा वगिरिशं पार्वती सहितं विभुम् ।
नमः शिवाय साम्बाय सोमसूर्याग्निदृष्टये ।।

प्रालेयानलदेहाय नमोऽनङ्गविनाशिने ।
विष्णुब्रह्मादि दिविषट् गणार्चितपदाय ते ।।

नमश्चन्द्रार्धचूडाय गङ्गामलकपर्दिने ।
नमो भुजङ्गभूषाय विभूतिधवलाय ते ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रुद्राक्षमालाभूषाय नमस्ते कृत्तिवाससे ।
पञ्चाक्षरजपासक्तजनकैवल्यदायिने ।।

नमश्शर्वाय शान्ताय सच्चिदानन्दरूपिणे ।
अणोरणीय ते तुभ्यं महतोऽपि महीयसे ।।

नमः कारुण्यपूर्णाय प्रणतार्तिहराय ते ।
भूयो भूयो नमस्तुभ्यं मृत्युञ्जय नमोऽस्तु ते ।।

इति स्तुतो महादेवो हरदत्तेन सादरम् ।
जगाद सर्वलोकेश प्रणयं तस्य मानसम् ।।

हरदत्त महाभाग महाभर्त महामते ।
तपसापूजयान्नित्यं त्रिकालं मम सेवया ।।

मध्याह्नेन जपेनापि स्तोत्रेण च ममान्वहम् ।
नितरां सुप्रसन्नोऽस्मि वरं वश्य साम्प्रतम् ।।

इत्युक्तो देवदेवेन हरदत्तो महामतिः ।
उवाच परमेशानं पार्वतीसहितं विभुम् ।।

यदि प्रसन्नो देवेश यदि मे वरदो भवान् ।
मद्‌गृहोभयपार्श्वस्थचतुर्दशगृहेषु च ।।

एवं सति जनास्तेषां पुनरावृत्तिवर्जिताम् ।
मुक्तिं देहि दयासिन्धो लोकनाथ नमोऽस्तु ते ।।

इति संप्रार्थितो देवस्तथेत्यंगीचकार सः ।
नभो विमानं ददृशे कोटिसूर्यसमप्रभम् ।।

मणिस्तम्भसहस्राढ्यं किङ्किणी जालशोभितम् ।
समारुह्य विमानाग्र्यं त्रयोदशगृहास्थिता ।।

सस्त्रीबालास्स सुहृदो सहस्रं बन्धिबान्धवाः ।
इत्यालोच्य तान् शम्भुः तमुवाच सुदर्शनम् ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चतुर्दशगृहेष्वेकोगृहवासी जनः कुतः ।
नायात इति तं प्राह हरदत्तो महामतिः ।।

काचित् कंसपुरे वृद्धा जराधवलमूर्द्धजा ।
झर्झरीकृत सर्वाङ्गी प्रकम्पित करानना ।।

प्रस्वलत्पदविन्यासा ब्राह्मणि भक्तिपूर्वकम् ।
बाल्यमारभ्य विघ्नेशं मोदकैः प्रतिवासरम् ।।

पूजयन्ति समासीनं तामप्यद्य समाह्वयत् ।
पञ्चभिर्मोदकान्यद्य विघ्नेशाय निवेद्य च ।।

पश्चाद्यामीति सोऽवाच तच्छ्रुत्वा संवचोऽब्रवीत् ।
अस्माभिस्सहसा याहि शिवः त्वं कथमेष्यसि ।।

इत्युक्ता मेऽस्ति विघ्नेशो यूयं गच्छत मा चिरम् ।।
इत्यवोचत् पावकेशेत्याचार्य प्राह शङ्करम् ।

तत् श्रुत्वा विस्मितो भूत्वा वह्नीशोऽपि विनायकम् ।।
पूजां गृहीत्वा वृद्धां तां पश्चात् कैलासमानयः ।

इति तत्रैव विघ्नेशं स्थापयित्वालयात् बहिः ।।
गन्तुं प्रचक्रमेऽग्नीशस्तस्मिन् समय आगतः ।

वैश्वदेवान्तबलिभुक् सुदर्शनगृहे वसन् ।
शुनकस्तुरुणो देशो विमानं प्रापयच्च तम् ।।
हरदत्ताचार्यमुख्यैः ययौ कैलासमीश्वरः ।

ऋषयः —

पश्चाद्वृद्धा किमकरोत् वद नो विस्तारान्मुने ।।

उपमन्युः —

मोदकेषु सुपक्वेषु विघ्नेशं भक्तिपूर्वकम् ।
पूजयामास वृद्धा सा मोदकैश्च सुसंस्कृतैः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तुष्टोऽस्मि जरटे तुभ्यं वरं वृणु यथेप्सितम् ।
इत्युक्ता जरटा वव्रे वरं लोकहितेच्छया ।।

स्वामिन् मत्कीर्तयेऽत्रैव वस सर्वैश्च पूजितः ।
प्रदक्षिणनमस्कारमोदकाद्यैश्च पूजितः ।।

सकृद्वाप्यर्चयन्ति त्वां कैलासं यान्ति ते विभो ।
कैलासगमने शक्तिं मह्यं दद विनायक ।।

इत्युक्तो विघ्नराजेऽपि दत्वा वरमभीप्सितम् ।
गत्वा कैलासगमने सामर्थ्यं च शिवालयात् ।।

बहिर्दक्षिण भागेद्याप्यास्ते तद्दिङ्मुखस्ततः ।
विघ्नेशकृपया वृद्धामायान्तिमतिवेगतः ।।

मध्येमार्गं तु तां दृष्ट्वा कथं वृद्धेतिवेगतः ।
आयातेऽत्यतिहर्षेण हरदत्तादिकं जने ।।

सति पृच्छति वृद्धा सा हरदत्तादिकं प्रति ।
अश्वेन गम्यते यामो वृद्धया चापि गम्यते ।।

इति लोक प्रसिद्धिश्च मिथ्यावेत्यवदन्मुदा ।
तच्छ्रुत्वा हर्षया युक्तास्तया सह चतुर्दश ।।

गृहिणो हरदत्तश्च कैलासं ययुरञ्जसा ।
सर्वे चन्द्रकलोत्तंसा मृगटंकधरा जनाः ।।

शिवसारूप्यमुक्तिं ते प्राप्ताश्शम्भोरनुग्रहात् ।
हरदत्तस्तु ससुतः सस्त्रिका परमेशितुः ।।
सायुज्यमुक्ति प्रापाशुपुनरावृत्तिवर्जिताम् ।।

उपमन्युः —

इतिहासमिमं पुण्यं धर्मकामार्थमोक्षदम् ।
श्रावयन्ति च श्रृण्वन्ति पठन्ति सततं नराः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विलिखन्ति शिवे भक्ता लेखयन्ति विशेषतः ।
विलिखं पुस्तकं दद्युः पुराणपठकाय ते ।।

ते सर्वे शिवसारूप्यं प्राप्नुवन्ति न संशयः ।
सदा शिवालये वापि शिवभक्तसमीपतः ।।

पठन्ति यमिदं पुण्यमाख्यानं सर्वदा जनैः ।
सारात् सारतरं पुण्यं इदमुक्तं मयानघ ।।

तस्माद्यूयं यथाकालं श्रृणुध्वं श्रद्धयान्विता ।
इति तेनेरितास्सर्वे सनकाद्या मर्हर्षयः ।।
उपमन्युं महाभागं अब्रुवन् साधु साध्विति ।।

इति भक्तवर्य हरदत्तसमुने
चरितं समस्त दुरितौघभञ्जनम् ।
श्रृणुयात् पठेत विमलाशयस्तदा
शिवरूपमेति शिवभक्तिमान् नरः ।।

।। इति शिवभक्तमाहात्म्ये हरदत्ताचार्यचरिते पञ्चषष्टितमोऽध्यायः ।।

।। श्रीसुन्दरेश्वराय नमः ।।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

சரசுவதி மகால் நூலக அச்சகம், தஞ்சாவூர்.

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy